## श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालय:
## विश्वविद्यालये छात्राणां प्रवेशार्थं तेषां नामाङ्कनार्थं च

### अध्यादेश: क्रमाङ्क: 01

### (परिसरस्य विधे: अनुसारेण नियमितच्छात्राणां कृते)
***(अधिनियमस्य धारा 6 (i) (ii) (xix), इत्यस्य 29 (1) (क) इत्यस्य चान्तर्गतम्)***

**1. प्रवेशः**

1) विश्वविद्यालय-द्वारा प्रस्तावितेषु शैक्षणिकेषु कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेश: तेभ्य: सर्वेभ्य: उपलप्स्यते, ये खलु एतेषु पाठ्यक्रमेषु प्रत्येकमपि कार्यक्रमेभ्य: पाठ्यक्रमेभ्य: च विद्या-परिषद्-द्वारा निर्धारितान् समर्हतामानदण्डान् सम्पूरयन्ति ।

2) संविधे: प्रावधानेषु कञ्चिदपि प्रतिकूलं प्रभावं विना, छात्र: तावत् पर्यन्तं कस्मादपि अन्यस्माद् विश्वविद्यालयात् मण्डलात् च प्रवासे एतस्य विश्वविद्यालयस्य अध्ययनस्य कस्मिंश्चिद् अपि कार्यक्रमे पाठ्यक्रमे च प्रवेशार्थं समर्हाः नैव भविष्यति यावत् पर्यन्तं तेन एतस्य विश्वविद्यालयस्य तत्तत्सम्बद्धेषु कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेशार्थम् अध्यादेश-द्वारा विनिश्चितायाः एतस्य विश्वविद्यालयस्य परीक्षाया: समकक्ष-परीक्षा उत्तीर्णा नैव कृता स्यात्:-

समयोऽस्ति यत् प्रवेशार्थम् आवेदनस्य समर्थने निम्नलिखितानि आवश्यकानि प्रपत्रकाणि सम्प्रदास्यन्ते-

क) सम्बद्ध-विश्वविद्यालयस्य मण्डलस्य च प्रवासप्रमाणपत्रम् अनापत्तिप्रमाणपत्रम् च,

अथ च कस्यचिद् अन्य-विश्वविद्यालयस्य निज-कार्यक्रमस्य पाठ्यक्रमस्य पूर्णता-विधानेन विना अत्र प्रवेशेच्छुकस्य छात्रस्य आवेदन-विषये एतस्य विश्वविद्यालयस्य कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेशार्थं विचार-विमर्श: तदैव कर्तुं शक्यते, यदि तत्रत्य-विश्वविद्यालयस्य पाठ्य-पद्धतिः पाठ्यक्रमश्च समानौ भवेताम्, सहैव तत्रत्य-श्रेय आदीनां हस्तान्तरणस्य सन्दर्भे पालनीयानां

विन्दूनां प्रावधानानां च  सम्पूर्तेः अन्तर्गतं, यदि कश्चिद् भवेत्, यः  एतस्मिन् विषये विनियम-द्वारा निर्धारणीयः  कर्तुं शक्ष्यते।

3) सम्बद्ध-विभागाध्यक्ष-द्वारा एतस्मिन् विश्वविद्यालये प्रवेशेच्छुकानां प्रत्येकमपि छात्राणां विधिवद् अग्रेषित-नामाङ्कनार्थम् आवेदनानि प्राप्तानि भवेयुः तानि अपि  विश्वविद्यालय-द्वारा नामितानि भविष्यन्ति :-

अत्रेदं ध्येयं यत् नामाङ्कनार्थम् आवेदनेन साकं अधोलिखितानि प्रपत्रकाणि नूनमेव संलग्नानि स्युः:-

क. अर्हता-परीक्षायाः अङ्कतालिकायाः छायाप्रतिलिपिः।

ख. प्रवास-प्रमाणपत्रम् अनापत्तिप्रमाणपत्रम् वा, मूलरूपे;

अपि च,

ग. विश्वविद्यालय-द्वारा निर्धारितं शुल्कप्राप्तिपत्रकम्।

4) विश्वविद्यालय-द्वारा नामिताय छात्राय एका नामाङ्कन-सङ्ख्या आवण्टिता भविष्यति।

5) यः छात्रः अध्ययनरतस्य कार्यक्रमस्य पाठ्यक्रमस्य वा सम्पूर्तौ उत वा अन्यथा कारणेन कस्मिंश्चिद् अन्यस्मिन् विश्वविद्यालये  संस्थाने वा प्रवेशम्  अभिस्वीकर्तुम् ईहते, सः प्रवास-प्रमाणपत्रस्य प्रसारणार्थं विश्वविद्यालये आवेदनं कर्तुम् अर्हति । विश्वविद्यालयः सम्प्राप्ते सति आवेदने प्रवासप्रमाणपत्रस्य प्रसारणं करिष्यति।

, तत् अधोलिखितेन समयैः भविष्यति।

क) आवेदनेन साकं निर्धारितं शुल्कं संलग्नं भवेत्;

ख) सर्वमपि अवशिष्टं धनं प्रदत्तं भवेत् , न किमपि अवशिष्टम् अस्तीति प्रसारितं प्रमाणपत्रं प्राप्तं स्यात्; अथ च;

ग) प्रवास-प्रमाणपत्रस्य प्रसारकस्य  विश्वविद्यालयस्य अधिकारिभिः नामाङ्कन-पञ्जिकायामपि एतस्मिन् विषये सम्बद्धा प्रविष्टिः  विहिता स्यात्।

6) विश्वविद्यालय-द्वारा प्रस्तावितेषु विभिन्नेषु कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेशार्थम् आवेदन-पत्राणि समये समये विद्या-परिषद्-द्वारा विनिश्चितानि करिष्यन्ते।

7) विश्वविद्यालय-द्वारा प्रत्येकमपि वर्षे विभिन्न कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेशार्थम् आवेदन-पत्राणां प्रपूरणस्य प्राप्तेश्च अन्तिमा तिथि: अधिसूचिता भविष्यति।

8) विश्वविद्यालय-द्वारा प्रत्येकस्मिन् वर्षे विभिन्नेषु कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेशस्य कृते अन्तिमा तिथि: अधिसूचिता भविष्यति।

9) विद्यापरिषद्द्वारा प्रत्येकमपि कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेशेच्छुकानां छात्राणां सङ्ख्या निर्धारिता भविष्यति।

10) यत्र प्रभावि स्यात्, तत्र छात्राणां प्रवेश: विश्वविद्यालय-द्वारा उत वा विद्या परिषद्-द्वारा अनुमोदितेन अन्येन अभिकरणेन समनुष्ठितायाः अखिल-भारतीय-प्रवेश-परीक्षाया: माध्यमेन सुनिश्चिताया: अर्हताया: आधारे दृढतापूर्वकं करिष्यते। एतस्या: परीक्षाया: उद्देश्य: लिखित-परीक्षया/ मौखिक-परीक्षया/ समूह-चर्चया/ वैयक्तिक-साक्षात्कारेण अथवा एतेषां संयोजनस्य माध्यमेन उच्चाध्ययनार्थं छात्राणां ज्ञानस्य, बोधन-सामर्थ्यस्य अर्हताया: च आकलनम् अस्ति ।

11) एतेषु सर्वेषु कार्यक्रमेषु/ पाठ्यक्रमेषु च प्रवेश: उपरि प्रतिपादितासु प्रवेश-परीक्षासु समधिगताया: श्रेण्या: आधारेण भविष्यति, अभ्यर्थि-जनाः अर्हता-परीक्षाया: परिणामस्य घोषणाया: अनन्तरं अभ्यर्थिनां न्यूनतम-पात्रता-मानदण्डस्य प्रपूरणानन्तरमेव प्रवेशार्हा: भविष्यन्ति। येषाम् अभ्यर्थिनाम् अर्हता-परिणाम: प्रतीक्षाधीन: अस्ति, तेभ्य: सितम्बर-मासस्य त्रिंशं दिनाङ्कं यावत् परिणाम-प्रदानस्य प्रतिश्रुतिपूर्वकम् अनन्तिम प्रवेशस्य प्रस्तावं प्रदातुं शक्यते, एवं न विहिते सति अनन्तिम: प्रवेश: निरस्तीकरिष्यते । एतै: अभ्यर्थिभि: एतद्विषयकम् एकम् प्रतिश्रुति-पत्रमपि प्रस्तोतव्यं भविष्यति।

12) समयाधारेण तेषां पाठ्यक्रमाणां प्रसङ्गेषु यत्र छात्राणां प्रवेश: अल्पीयान् अस्ति, तत्र प्रवेशस्य अर्हता परीक्षायां प्राप्ताङ्कानाम् आधारेण निर्धारिताया: अर्हताया: आधारे प्रवेश: कर्तुं शक्यते । एतस्मिन् विषये प्रवेश-विषयक: निर्णय: सम्बद्ध-विभागस्य अनुशंसायां विद्या-परिषद्-द्वारा विधास्यते।

13) प्रवेश-परीक्षा मुख्यालये अथ वा विश्वविद्यालय-द्वारा तत्तत्समये अधिसूचितेषु प्रोक्तेषु अन्य-स्थानेषु आयोजिता भविष्यति।

14) प्रवेश-परीक्षाया: कृते प्रश्न-पत्राणि कुलपतिद्वारा नियुक्तै: विशेषज्ञ-जनैः निर्धारितानि भविष्यन्ति।

15) प्रवेश-परीक्षाया: अवसरे अभ्यर्थि-जनाः परीक्षा-नियन्त्रकेण नियुक्तस्य मुख्याधीक्षकस्य अनुशासनात्मके नियन्त्रणे भविष्यन्ति, परीक्षा-सञ्चालन-विषये तस्य निर्देशा: अन्तिम बाध्यकारिण: भविष्यन्ति।

16) यदि कश्चित् अभ्यर्थी प्रदत्त-निर्देशानाम् अनुपालनं नैव कुरुते उत वा केन्द्रे पर्यवेक्षक-दलस्य केनापि सदस्येन अथवा केनापि पर्यवेक्षकेण साकं दुर्व्यवहारम् आचरति, तर्हि स: परीक्षाया: निष्कासित: भवितुं शक्नोति।

17) मुख्याधीक्षक: एतादृशस्य प्रकरणस्य तथ्यानि साक्ष्यस्य पूर्ण-विवरणानुसारेण सत्वरमेव परीक्षा नियन्त्रकाय निवेदयिष्यति य: एतस्य प्रकरणस्य अग्रे कार्यान्वयनार्थं परीक्षानुशासन-समितये प्रेषयिष्यति तदा एतया समित्या यथोचितं ज्ञात्वा कार्यमनुष्ठास्यति।

18) परीक्षानुष्ठानस्य अवसरे अनुशासनस्य प्रवर्तनस्य उद्देश्येन सम्बद्धस्य अध्यादेशस्य संगतानि प्रावधानानि यत्रापि क्रियान्वितानि स्यु:, प्रवेश-परीक्षासु अपि क्रियान्वितानि भविष्यन्ति।

19) अध्ययनस्य विभिन्न-कार्यक्रमेषु पाठ्यक्रमेषु प्रवेश-सबद्धस्य सदनस्य विभागस्य वा प्रवेश-समिति-द्वारा विमर्श: विधास्यते, यस्मिन् अध्यक्ष-रूपेण संकाय-प्रमुख: , सदस्य-रूपेण विभागाध्यक्ष:, कुलपति-द्वारा नामितौ द्वौ अन्यौ जनौ च सम्मिलितौ भविष्यत:, येषु एक: नामित: जन: आरक्षितानां श्रेणीनां प्रातिनिध्यं करिष्यति एवं समितौ एका महिला प्रतिनिधिश्चापि सम्मिलिता भविष्यति।

20) प्रवेश-परीक्षाया: पाठ्यचर्या, प्रारूपं, अवधि:, मूल्याङ्कनस्य योजना च विश्वविद्यालय-द्वारा अनुमोदित-प्रवेश-समिति-द्वारा निर्धारयिष्यन्ते।

21) विभिन्न-विभागानां कार्यक्रमेषु/पाठ्यक्रमेषु प्रवेशार्थं न्यूनतमा: अर्हता: विनियमानां द्वारा प्रदत्तै: शुल्क-शैथिल्यताया: अधीने विभागस्य संकाय-प्रमुखाणां/ विभागाध्यक्षाणां च अनुशंसायां विद्या-परिषद्-द्वारा निर्धारिता: भविष्यन्ति ।

22) प्रवेश-परीक्षायां प्राप्तांकेषु साम्ये सति , अर्हता-परीक्षायाम् अर्हताया: निर्धारणार्थं प्राप्तेषु अङ्केषु विचारः करिष्यते ।

23) केवलं तादृशा: अभ्यर्थिन: यै: राज्य/केन्द्र-सर्वकार-द्वारा स्थापितानाम् अथवा मान्यताप्राप्तानां केषाञ्चिदपि भारतीय-विश्वविद्यालयानां मण्डलानां वा परीक्षा समुत्तीर्णा स्यात् अथ वा राज्य/केन्द्र सर्वकारद्वारा /विश्वविद्यालयद्वारा वा समकक्ष-मान्यता-प्राप्त काचिदपि अन्या परीक्षा समुत्तीर्णा स्यात्, प्रवेशार्थं विचारणीयाः भविष्यन्ति ।

24) विश्वविद्यालय-द्वारा प्रस्तावितेषु शैक्षणिकेषु कार्यक्रमेषु पाठ्यक्रमेषु च प्रतिशतं पञ्चदश आसनानि अनुसूचित-जातीयेभ्यः छात्रेभ्य:, अनुसूचित-जनजातीयेभ्य: छात्रेभ्य: प्रतिशतं सार्ध-सप्त-मितानि आसनानि, अन्य पश्चवर्ति-वर्गीयेभ्य: छात्रेभ्यश्च प्रतिशतं सप्तविंशतिः आसनानि, आर्थिक-रूपेण अशक्त-वर्गीयेभ्य: (ईडब्ल्यूएस) छात्रेभ्यश्च प्रतिशतं दश आसनानि ***विकलाङ्गजनेभ्यश्च*** प्रतिशतं पञ्च आसनानि ***आरक्षितानि भविष्यन्ति।***

तत्रैक: समय: अस्ति यद् एतस्यां धारायां किमपि प्रावधानं महिलानां, दिव्याङ्गजनानां विशेष-रूपेण च अनुसूचितजाते:, अनुसूचित-जनजाते: अन्येषां नागरिकाणाम् अन्यसामाजिकानां ये खलु शैक्षिकरूपेण पश्चवर्ति-वर्गीयाणां च प्रवेशस्य कृते विशेष-प्रावधान-विधानार्थं विश्वविद्यालयाय अवरोधकं नैव प्रभविष्यति।

अत्र हि समय: अस्ति यत् अधिवासस्य आधारेण न किमपि एतादृशं सविशेषं प्रावधानं नैव करिष्यते।

25) विश्वविद्यालय-द्वारा यथाकालं निर्धारितेषु सम्बद्धेषु कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेशार्थं न्यूनतम-पात्रताया:, समये-समये अन्येषाम् निबन्धनानां च सम्पूर्त्यधीने प्रत्येकमपि कार्यक्रमे

पाठ्यक्रमे वा प्रवेश-सन्दर्भे रक्षाकार्मिकेभ्य: सामान्यप्रवेशाय प्रतिशतं पञ्चतोऽधिकानि आसनानि आरक्षितानि भविष्यन्ति ।

25 (क) विश्वविद्यालयस्य विभागेषु वैदेशिक-छात्रेभ्य: सुनिश्चितेषु आसनेषु प्रतिशतं पञ्चदश-मितेषु प्रतिशतं पञ्च-मितानि आसनानि खाति-देशेषु दक्षिणैशिया-महाद्वीपेषु च भारतीयकर्मकराणां सन्ततीनां कृते निर्धारितानि भविष्यन्ति।

तत्रापि एष: समय: क्रियान्वित: भविष्यति यद् भारतीय-रक्षा-कर्मकरस्य आवेदकस्य कृते वरीयता-क्रमस्य नियम: विश्वविद्यालयानुदानायोगस्य निर्देशानाम् अनुसारेण भविष्यति।

26) व्यावसायिकान् पाठ्यक्रमान् अतिरिच्य, सर्वेभ्यः कार्यक्रमेभ्य: पाठ्यक्रमेभ्य: च कक्षाणां प्रारम्भ:, तत्-तत्-समये प्रसारितानां संशोधितानां च उपाधि-प्रदानस्य निर्देशानां न्यूनतम-मानकै: सम्बद्धै: यूजीसीति विश्वविद्यालयानुदानायोगस्य मानदण्ड-द्वारा नियन्त्रित: भविष्यति।

27) विश्वविद्यालय-द्वारा प्रस्तावितेभ्यः कार्यक्रमेभ्य: पाठ्यक्रमेभ्य: च न्यूनतम: अधिकतमश्च अवधि: समये समये राष्ट्रिय-विनियामक-निकाय-द्वारा निर्धारितानां विनियमानाम् आवश्यकताया: अनुरूपं विद्या-परिषद्-द्वारा विनिश्चितो भविष्यति ।

28) विश्वविद्यालय-द्वारा कश्चिदभ्यर्थिने निर्धारितस्य शुल्कस्य प्रदानस्य पश्चादेव विश्वविद्यालयस्य छात्रत्वेन तस्य नामाङ्कने जाते सति विश्वविद्यालयस्य कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेश: प्रदास्यते।

29) एतस्य विश्वविद्यालयस्य अन्य-विश्वविद्यालयस्य वा कश्चिदपि छात्र: ऑनलाइन इति अन्तर्जालीयान् कार्यक्रमान् पाठ्यक्रमान् अंशकालिक-कार्यक्रमान् सप्ताह-व्यापिन: डिप्लोमा इत्याख्यान् उपाधिपत्रीयान् पाठ्यक्रमान् च विहाय युगपदेव उपाधि-द्वयस्य पाठ्यक्रमार्थम् अन्य-पूर्णकालिक-पाठ्यक्रमार्थं च नैव अनुमंस्यते।

30) विश्वविद्यालये प्राप्तप्रवेश: छात्र: हॉल ऑफ रेसीडेंस इत्यस्य छात्रावासस्य अथवा विश्वविद्यालयस्य अनिवासि-छात्र-केन्द्रस्य वा सदस्य: भविष्यति।

31) यदि कदापि एतद् अभिज्ञायते यत् प्रवेश-प्राप्प्त्यर्थम् केनचिदपि अभ्यर्थिना अनुचितं असत्यं मृषा-कथनं वा कृतमस्ति उतवा अन्य-प्रवञ्चना-पद्धतय: समाश्रिताः सन्ति चेत् तस्य नाम विश्वविद्यालयस्य नामाङ्कन-पञ्जिकात: अपाकृतं करिष्यते।

## 2. कार्यक्रमाणां पाठ्यक्रणां च अवधिः

1) विश्वविद्यालय-द्वारा उपाधि-डिप्लोमा-प्रमाणपत्रादि-प्रदायकानां शैक्षणिकानां कार्यक्रमाणां पाठ्यक्रमाणां च न्यूनतम: अधिकतम: वा अवधि: विद्या-परिषद: संस्तुतौ प्रत्येकमपि कार्यक्रमेभ्य: पाठ्यक्रमेभ्यश्च निर्धारित: करिष्यते। विद्या-परिषद्-द्वारा अन्ये समया: चापि निर्धारयितुं शक्यन्ते, ते च समया: छात्रै: तत्तदुपाधि-प्राप्तये, डिप्लोमा इति उपाधिपत्रम् अधिगन्तुं प्रमाणपत्रस्य समर्जनार्थं च समर्हणीयतां प्राप्तुं प्रपूरणीया: भविष्यन्ति।

2) विश्वविद्यालय-द्वारा प्रस्तावितेभ्यः कार्यक्रमेभ्य: पाठ्यक्रमेभ्य: च न्यूनतम: अधिकतम: वा अवधि: विद्या-परिषद्-द्वारा निर्धारित: करिष्यते।

## 3. कार्यक्रमस्य/पाठ्यक्रमस्य संरचना प्रारूपं च

विश्वविद्यालय: विद्या-परिषद: अनुसंशायां स्वयं प्रस्तावितानां कार्यक्रमाणां पाठ्यक्रमाणां च संरचना: प्रारूपाणि च निर्धारयितुं शक्नोति, येन उपाधे:, डिप्लोमा इत्यस्य उपाधिपत्रस्य च सामर्थ्यम् एधिष्यते। अत्रापि समय: अस्ति यत् विश्वविद्यालय: नैज-सर्वेषु कार्यक्रमेषु पाठ्यक्रमेषु च मॉड्यूलर-संरचनानां, पाठ्यक्रमाणां च संयोजने नमनीयतया साकमेव अवबोधनस्य शिक्षणस्य च विधीनां, गतीनां, विभिन्नानां कार्यक्रमाणां पाठ्यक्रमाणां च कृते पाठ्यक्रमानुसारेण पञ्जीकरणादीनाम् आधारे समायोजनस्य प्रयासं करिष्यति।

## 4. वैदेशिकनागरिकाणां पञ्जीकरणम्/प्रवेश :

1) कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेशार्थं सामान्य-प्रवेशस्य सङ्ख्यात: प्रतिशतं पञ्चाधिकं स्थानानि वैदेशिकेभ्य: राष्ट्रियेभ्यः अन्ताराष्ट्रियेभ्यः छात्रेभ्य: भविष्यन्ति।

2) विश्वविद्यालय-द्वारा अधिसूचितस्य कार्यक्रमस्य च अनुपालने विश्वविद्यालये प्रवेशेच्छुकेन वैदेशिकेन नागरिकेण विश्वविद्यालयस्य शैक्षणिके अनुभागे नैजं पञ्जीकरणं विधेयं भविष्यति। कश्चिदपि वैदेशिक: छात्र: केनचिदपि विभागेन विद्यालयेन वा साक्षाद्रूपेण नैव प्रवेक्ष्यते। वैदेशिका: छात्राः केवलं तेषां देशेन सम्बद्धानाम् उच्चायोगानां दूतावासानां च संस्तुतौ पञ्जीकरिष्यन्ते।

3) वैदेशिकेभ्यः नागरिकेभ्य: व्यावसायिकान् पाठ्यक्रमान् समेत्य विभिन्नेषु स्नातकीयेषु स्नातकोत्तरीयेषु च कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेशार्थम् आयोजितासु प्रवेश-परीक्षाभ्यः मुक्तिर्दास्यते। ते प्रवेश-परीक्षा-प्रदानात् मुक्ता: भविष्यन्ति। वैदेशिका: नागरिका: ये भारते नियुक्ता: कार्यरताः च सन्ति, अथ च तै: भारते एव कस्यचिद् मण्डलस्य विश्वविद्यालयस्य वा अन्तिमा परीक्षा उत्तीर्णा अस्ति, तेऽपि प्रवेश-परीक्षा-प्रदानात् मुक्ता: भविष्यन्ति ।

वैदेशिक-छात्राणां सर्वाः श्रेण्यः विभिन्नेषु कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेशार्थं प्रतिशतं 5मितमात्रायाः एकस्यामेव श्रेण्याम् आयास्यन्ति। एतस्यां भारतीयमण्डलात्/विश्वविद्यालयात् अथवा वैदिशिकमण्डलात्/विश्वविद्यालयात् प्राप्तार्हतावैदेशिकनागरिकाः सम्मिलिताः भविष्यन्ति।

4) वैदेशिक-छात्राणां सर्वाः श्रेण्यः विभिन्नेषु कार्यक्रमेषु पाठ्यक्रमेषु च प्रवेशार्थं प्रतिशतं 5मितमात्रायाः एकस्यामेव श्रेण्याम् आयास्यन्ति। एतस्यां भारतीयमण्डलात्/विश्वविद्यालयात् अथवा वैदिशिकमण्डलात्/विश्वविद्यालयात् प्राप्तार्हतावैदेशिकनागरिकाः सम्मिलिताः भविष्यन्ति।

5) विदेशीयछात्रवर्गे सर्वे प्रवेशाः व्यक्तिगतयोग्यतायाः आधारेण करिष्यन्ते अथ च विदेशीययोग्यतायुक्तानां भारतीयानां विदेशीयानां च छात्राणां कृते विविधकार्यक्रमेषु/पाठ्यक्रमेषु प्रवेशार्थं एकैव योग्यतासूची निर्मिता भविष्यति।

6) यत्र प्रवेशार्थं कुल आसनानां सङ्ख्या 20 तः न्यूना भवति तत्र सर्वेषु कार्यक्रमेषु/पाठ्यक्रमेषु न्यूनातिन्यूनं एकम् आसनं विदेशीयनागरिकाणां कृते आरक्षितं भविष्यति।

7) अस्मिन् विश्वविद्यालये प्रवेशं इच्छतां विदेशीयनागरिकैः चिकित्सागोपयोजनायाः प्राप्तिः अनिवार्या भविष्यति।

8) विदेशीयछात्रैः शैक्षणिकपरिषद्द्वारा निर्धारितं वार्षिकशुल्कं दातव्यं भवति।

**5. शुल्कस्य प्रत्यावर्तनम् :**

1) **शुल्कस्य प्रेषणं प्रत्यावर्तनं च समेत्य अन्य-छात्र-केन्द्रित-प्रकरणेषु विश्वविद्यालयानुदानायोगस्य अधिसूचनायां निर्धारित-प्रावधानानि शुल्क-प्रत्यावर्तन-सन्दर्भे दृढता-पूर्वकं पालयिष्यन्ते।**

**श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालय:**

**विश्वविद्यालये अध्ययनस्य पाठ्यक्रमार्थं विश्वविद्यालयस्य परीक्षार्थम्, उपाधि-डिप्लोमा-प्रमाणपत्रीय-कार्यक्रमार्थं च प्रवेशहेतु: स्वीक्रियमाणशुल्कविषये**

**अध्यादेशक्रमाङ्क: 02**

***(अधिनियमस्य धारा 6 (1) (xx) इत्यस्य 29 (1) (ङ) इत्यन्तर्गतम्)***

1. विद्या-परिषद: अनुशंसायां कार्य-परिषद्, समये समये छात्राणां प्रदेयं शुल्कं निर्धारयिष्यति।

2. **देयतिथि:, शुल्कप्रदान-पद्धति: च :**

छात्रै: विश्वविद्यालय-द्वारा समये समये निर्धारितं शुल्कं विश्वविद्यालय-द्वारा निर्धारितदिनाङ्के तत्पूर्वं वा प्रदेयं भविष्यति।

3. **शुल्कप्रदाने विलम्ब: उत वा त्रुटि:**

i. यदि कश्चिच्-छात्र यथाकालं शुल्कप्रदानं नैव करोति, तर्हि समग्र-देय-शुल्के निम्नानुसारेण अतिरिक्तं विलम्बशुल्कं देयं भविष्यति। :

क) प्रथम दश-दिवसेभ्य: शुल्कस्य प्रतिशतं दश-मितम्।

ख) तत: परं दश-दिवसेभ्य: शुल्कस्य प्रतिशतं विंशतिमितम्।

ग) तदनु च देयतिथित: एकमासं यावत् शुल्कस्य प्रतिशतं त्रिंशन्मितम्।

ii. कुलपते:, अथवा तत्पक्षत: कश्चिद् अन्य: अधिकारी, यस्मै एतद्विषयिणी शक्ति: समर्पिता अस्ति, तत्सम्बद्ध विभागस्य, सदनस्य वा संकाय-प्रमुखस्य अनुशंसायां विशिष्टेषु प्रकरणेषु शुल्कस्य प्रदानार्थं कस्मिन्नपि समये शैथिल्यं मुक्तिं वा दातुं शक्नोति , तत्रापि एक:

समय: अस्ति यत् सम्बद्ध: छात्र: शुल्कस्य विलम्बेन प्रदानस्य कारणानि उल्लेखयन् एकं लिखितम् आवेदनं प्रस्तोष्यति। एतद् आवेदनं नियत-दिनाङ्कत: पूर्वमेव प्रस्तोतव्यं भविष्यति, येन निर्णयं स्वीकर्तुं शक्येत।

iii. शुल्कप्रदाने विफलानां नामानि सूचनापटे प्रदर्शयिष्यन्ते। आगामिमासे च प्रथमे दिवसे ते छात्राः विश्वविद्यालयस्य पञ्जीयन-पञ्जिकात: अपि अपाकरिष्यन्ते।

iv. यस्य छात्रस्य नाम विश्वविद्यालयस्य पञ्जीयन-पञ्जिकात: अपाकृतम् अस्ति, तस्मै छात्राय विश्वविद्यालय-द्वारा सम्बद्ध-विभागस्य संकायप्रमुखस्य संस्तुतौ अवशिष्ट-पूर्ण-शुल्क-ग्रहण-पूर्वकम् अन्य-देय-शुल्कस्य प्रदानेन साकमेव निर्धारितस्य पुन:प्रवेश-शुल्कस्य प्रदाने च पुन: प्रवेशं दातुं शक्यते। एषः पुनः प्रवेश: तस्यैव सत्रस्य अन्तर्गतं भविष्यति अथ च छात्रद्वारा न्यूनतम-उपस्थिते: मानदण्डस्य सम्पूरणे निर्भरिष्यति।

v. यदा कदापि कश्चिदपि छात्र: विश्वविद्यालयात् प्रत्यावर्तनार्थं प्रस्तावं प्रस्तौति तदा तेन विभागप्रमुखस्य माध्यमेन सम्बद्ध-संकाय-प्रमुखाय निज प्रतिनिवर्तनस्य दिनाङ्कं सूचयता एकम् आवेदनं प्रस्तोतव्यं भविष्यति। यदि स: एतत्कर्तुं विफलो जायते तर्हि: तस्य नाम तस्मात् मासाद् अनन्तरम् आधिक्येन एकमासावधये विश्वविद्यालयपञ्जिकायां यथावस्थमेव वर्तिष्यते, यावत् पर्यन्तं तेन शुल्कं प्रदत्तम् अस्ति। ततश्च तेन अस्मिन् निजावधौ सर्वम् अपि देयं शुल्कं प्रभारसहितम् अनिवार्यत्वेन प्रदेयं भविष्यति।

## 6. शुल्कप्रदाने शैथिल्यम् :

i. विश्वविद्यालय: समये समये भारतसर्वकारेण यूजीसीति विश्वविद्यालयानुदानायोगेन च प्रसारितानां दिङ्-निर्देशानाम् अनुसारेण छात्रेभ्य: निःशुल्कं छात्रवृत्तिं प्रदास्यति।

ii. भारत-सर्वकारस्य निर्देशानाम् अनुसारेण अनुसूचित-जातीयेभ्य:, अनुसूचित-जनजातीयेभ्य:, कश्मीरस्य प्रवासि-छात्रेभ्य: कासाञ्चिद् अन्यश्रेणीनां च छात्रेभ्यः शुल्कमुक्ति: शुल्कशैथिल्यं क्रियान्वयिष्यते।

## 7. शुल्क-प्रतिभूतिश्चेत्यादीनां प्रत्यावर्तनम् :

शुल्क-प्रतिभूति-सुरक्षानिधि-सन्निभः विश्वविद्यालयेन एकत्रीकृतः निधिः समये समये विश्वविद्यालयस्य नियमानुगुणं प्रत्यावर्तिष्यते।

**8.** विश्वविद्यालय-द्वारा समये समये सुनिश्चितं शुल्कं छात्रै: विभिन्नेभ्य: पाठ्यक्रमेभ्य: कार्यक्रमेभ्य: च देयं भविष्यति।

**9.** छात्रेभ्य: तावत्पर्यन्तं परीक्षा-प्रवेश-पत्रं नैव प्रसारयिष्यते अथवा ते परीक्षायाम् उपवेष्टुं नैव अनुमंस्यन्ते यावत् पर्यन्तं ते नैजम् अवशिष्टं शुल्कं न प्रदास्यन्ति। परीक्षा-शुल्कं च न दास्यन्ति।

### 10. परीक्षा-परिणामस्य पुन: निरीक्षणार्थं शुल्कम् :

विश्वविद्यालय-द्वारा परीक्षा-परिणामस्य पुन: निरीक्षणार्थं शुल्क-निर्धारणं करिष्यते।
अत्रेदं ध्येयं यत् विश्वविद्यालय-द्वारा यदि परिणामस्य पुनरीक्षणे अधिसूचितेषु परिणामेषु काचिदपि त्रुटि: स्खलनं वा प्राप्यते चेत् अभ्यर्थि-जनाय शुल्कस्य प्रत्यावर्तनं करिष्यते।

### 11. अङ्कानां विवरणस्य आपूर्त्यर्थं शुल्कम् :

i. प्रत्येकमपि अभ्यर्थिना विश्वविद्यालय-द्वारा प्रतिपरीक्षाम् अङ्कानां विवरणस्य आपूर्तये निर्धारितस्य शुल्कस्य प्रदानं परीक्षा-शुल्केन समं कर्तव्यं भविष्यति।

ii. विश्वविद्यालय-द्वारा निर्धारित-शुल्कस्य प्रदाने अङ्क-विवरणस्य डुप्लिकेट इति समनुरूपप्रतिलिपि-विवरणिका प्रत्येकम् अङ्कविवरणार्थं प्रदास्यते।

**12. स्थानान्तरणप्रमाणस्य अनन्तिम-प्रमाणपत्रस्य अन्यप्रमाणपत्राणां कृते शुल्कम् :**

i. विश्वविद्यालय-द्वारा निम्नलिखितानां प्रपत्रकाणां प्रसारणार्थं तेषां डुप्लिकेट इति समनुरूपप्रतिलिपि-प्रपत्रकाणां च कृते शुल्क-निर्धारणं करिष्यते:

क) स्थानान्तरण-प्रमाणपत्रस्य/ स्थानान्तरणप्रमाणपत्रस्य डुप्लिकेट-प्रतिलिपेश्च।

ख) विश्वविद्यालयस्य परीक्षोत्तीर्णताया: अनन्तिम-प्रमाणपत्रस्य/ उपर्युक्तस्य डुप्लिकेट इति प्रतिलिपे:।

ग) उपाधिप्रमाणपत्रस्य (वैयक्तिकरूपेण )/उपाधिप्रमाणपत्रस्य (अनुपलब्धौ )/उपाधे: डुप्लिकेट इति प्रतिलिपे: (एफआईआर इत्यस्य प्रस्तुतौ)

घ) मूलनिवासप्रमाणपत्रस्य।

ङ) केषाञ्चन अन्यप्रमाणपत्राणां डुप्लिकेट इति प्रतिलिपे:

ii. य: छात्र: अभ्यर्थी वा विश्वविद्यालयस्य पञ्जिकासु मूलरूपेण पञ्जीकृते निजे नाम्नि किमपि संयोजनं परिवर्तनं वा कर्तुम् इच्छति, तदा तेन विश्वविद्यालय-द्वारा एतदर्थम् निर्धारितस्य शुल्कस्य प्रदानं करणीयं भविष्यति। आवश्यकानाम् औपचारिकतानाम् सम्पूरणानन्तरं विश्वविद्यालयस्य नामाङ्कन-पञ्जिकायाम् उपनाम-रूपेण तस्य मूल-नाम्नि एतादृशं संयोजनं परिवर्तनं वा विधास्यते।

iii. कश्चित् छात्र: य: विश्वविद्यालयस्य पञ्जिकायां पञ्जीकृतां निजं जन्मदिनाङ्कं परिवर्तयितुम् इच्छति तदर्थम् आवेदनं च करोति, तदापि तेन विश्वविद्यालय-द्वारा एतदर्थं निर्धारितं शुल्कं प्रदेयं भविष्यति। सक्षम-प्राधिकारिण: अनुमोदनं विना जन्मदिनाङ्के किमपि परिवर्तनं नैव करिष्यते।

## श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालय:

## अध्येतावृत्ते:, छात्रवृत्ते:, विद्यार्थिवृत्ते:, पदकानां पुरस्काराणां च निर्णये

### अध्यादेश-क्रमांक: 04

***(अधिनियमस्य धारा 6 (1) (xiv) एवं 29 (1) (च) इत्यस्य अन्तर्गतम्)***

1. मेधाविभ्य: योग्य-छात्रेभ्यश्च कमपि वित्तीयम् आपीडं विना विश्वविद्यालये अध्ययनस्य अनुसन्धानस्य च कार्यक्रमेषु पाठ्यक्रमेषु च अग्रे नयनस्य प्रोत्साहनार्थं, विश्वविद्यालय: वित्तीय-सहायतायै पर्याप्त-सङ्ख्यायां छात्रवृत्ति-अध्येतावृत्ति-विद्यार्थिवृत्ति-प्रदान-पुरस्सरं शुल्क-शैथिल्यं शुल्कमुक्तिं चापि प्रदातुं प्रयतिष्यते, अथ चैतेभ्य: पदकानि पुरस्कारांश्चापि प्रदातुं प्रावधानं करिष्यति।

2. विश्वविद्यालयस्य छात्रेभ्य: प्रत्येकस्मिन् विषये निधीनाम् उपलब्धताया: आधारे छात्रवृत्ति: प्रदास्यते। छात्रवृत्ति-प्रदानस्य नियमा: एतस्य विनियमेषु निर्धारयिष्यन्ते ।

3. निधीकरणाभिकरणस्य मानदण्डानाम् अनुसारं प्रत्येकेषु सदनेषु शिक्षणविभागेषु च सार्धं पूर्णं वा शिक्षण-शुल्कस्य मुक्ते: रूपेण शुल्क-शैथिल्यं प्रदास्यते।

4. निधीनाम् उपलब्धताया: आधारे अर्ह-छात्रवृत्ते: एका योजनापि भविष्यति, यत्र प्रत्येकस्मिन् विषये प्रथम-द्वितीय-श्रेणी-धारकेभ्य: छात्रेभ्यः छात्रवृत्ति-प्रदानं करिष्यते, यस्य राशि: विश्वविद्यालय-द्वारा समये समये विनिश्चेष्यते ।

5. विश्वविद्यालय-स्तरे कुलपति-द्वारा संघटितैका समिति: सर्व-प्रकारकाणां छात्रवृत्तीनां शुल्कमुक्ते:, शुल्कशैथिल्यस्य च प्रबन्धनं करिष्यति।

6. विश्वविद्यालये समये समये विभिन्नानां निधीकरणस्य अभिकरणानां मानदण्डानाम् अन्तर्गतम् अनुमोदितस्य अध्ययनस्य अनुसन्धानस्य च कृते, निधे: उपलब्धताया: अन्तर्गतम्, अध्येतावृत्ते: प्रवर्तनं करिष्यते।

7. विश्वविद्यालयस्य मेधाविभ्य: छात्रेभ्य: विभिन्न-विश्वविद्यालयपरीक्षासु तेषां सर्वश्रेष्ठ-प्रदर्शनार्थं पदक-पुरस्कार-प्रदानस्य योजना भविष्यति।

8. विश्वविद्यालयस्य पार्श्वे विंशत्युत्तर-द्वि-सहस्र-तम-वर्षीयस्य केन्द्रीय-संस्कृत-विश्वविद्यालयीयाधिनियमस्य अनुसारं समये-समये व्यवस्थापनस्य शक्ति: भविष्यति।

9. कुलपति-द्वारा प्रत्येकं व्यवस्थापनस्य प्रशासन-प्रबन्धनस्य च उद्देश्यान् कार्यान्वयीकर्तुं एका समितिश्चापि रचयिष्यते।

## श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालय:

## दीक्षान्तसमारोहे

### अध्यादेश-क्रमाङ्क: 04

***अधिनियम की धारा 6 (1) (ii) और 29 (1) (ण) के अन्तर्गत***

1. उपाधीनां डिप्लोमा-इत्युपाधिपत्राणां च प्रदानस्य उद्देश्येन दीक्षान्त समारोहस्य आयोजनं सामान्यतया कुलाधिपते: अनुमोदनेन कुलपति-द्वारा विनिश्चित-दिनाङ्के स्थाने च आयोक्ष्यते।

तत्र समयोऽस्ति यत् प्रक्रियानुसारं मानदोपाधिप्रदानार्थं वा शैक्षणिकपरिषदः अनुशंसया विशेषपरिस्थितौ अन्योपाधिप्रदानार्थं वा कार्यकारिपरिषद्द्वारा निर्णयानुसारं तस्मिन् समये विशेषदीक्षसमारोहः भवितुं शक्नोति।

2. यदि कुलाधिपति: उपस्थितो भवेत् तदा स: उपाधीनां डिप्लोमा चेत्येतेषां च वितरणार्थं समनुष्ठितस्य विश्वविद्यालयस्य दीक्षान्त-समारोहस्य अध्यक्षतां करिष्यति। कुलाधिपते: अनुपस्थितौ कुलपति: दीक्षान्त-समारोहस्य अध्यक्षतां करिष्यति।

3. कुलपति:, कुलाधिपते: परामर्शपूर्वकं दीक्षान्त-समारोहे दीक्षान्त-भाषणार्थं कमपि प्रतिष्ठितं विशिष्टं जनम् आमन्त्रयितुं शक्नोति।

4. कुलपति: विश्वविद्यालयस्य प्रगति-विषये वार्षिक-दीक्षांत समारोहे एकं विवरणं प्रस्तोष्यति।

5. दीक्षान्त-समारोहस्य कृते सम्बद्ध-वैधानिक-प्राधिकारिणाम् उपवेशनार्थं कुलसचिव-द्वारा न्यूनान्न्यूनं सप्ताह-द्वयस्य सूचना प्रदास्यते ।

6. सम्बद्धः अधिकारी, सूचनया साकं, दीक्षान्त-समारोहस्य प्रत्येकं सदस्येभ्य: समारोहावासरे अनुपालनीयाया: प्रक्रियाया: एकां कार्यक्रम-सूचीं प्रसारयिष्यति।

7. ये अभ्यर्थिन:; यै: विगत-दीक्षान्त-समारोहस्य अनन्तरं निज-परीक्षा: उत्तीर्णा: सन्ति, ते दीक्षान्त-समारोहे प्रवेशार्हा: भविष्यन्ति।

***उपाधि-प्रदानस्य दिनाङ्कः तद्दिनाङ्कात् परं 180 दिनानाम् अभ्यन्तरे भविष्यति, यदन्तर्गतं छात्रेभ्य: एतदर्थम् अर्हता-समर्जनम् आशास्यते।***

अत्रैक: समय: वर्तते यद् यदि कस्मिंश्चिद् विशिष्टे वर्षे दीक्षान्त-समारोह: नैव आयोज्यते चेत् तदा कुलपति: तस्मिन् वर्षे सफलीभूतेभ्य: अभ्यर्थिभ्य: तेषाम् अनुपस्थितौ उपाधये/डिप्लोमा प्राप्तये च तेषां प्रवेशम् अधिकृतं कर्तुं, निर्धारित-शुल्कस्य प्रदत्ते सति उपाधीनां डिप्लोमा इत्युपाधिपत्राणां प्रसारणे च सक्षम: भविष्यति।

8. उपाधि-प्राप्तये डिप्लोमा-लब्धये च अभ्यर्थिना दीक्षान्तसमारोहे वैयक्तिक-रूपेण सम्बद्धाधिकारिण: पार्श्वे उपाधौ प्रवेशार्थं निर्धारित-तिथे: पूर्वं उत वा ततोऽपि पूर्वं निर्धारितेन शुल्केन साकं नैजम् आवेदनं प्रपूरणीयं भविष्यति।

9. य: खलु अभ्यर्थी दीक्षान्त-समारोहे व्यक्तिगत-रूपेण उपस्थातुम् असमर्थो विद्यते, तस्मै कुलपतिना तस्य अनुपस्थितौ एव उपाधि: प्रदास्यते, तस्य उपाधि: तदीयानुरोधे निर्धारित-शुल्केन सह परीक्षा-नियन्त्रक-द्वारा प्रसारयिष्यते।

10. विश्वविद्यालय-द्वारा दीक्षान्त-समारोहे व्यक्तिगत-रूपेण अथवा अनुपस्थितौ च उपाधि-ग्रहण-प्रवेशार्थं शुल्कं निर्धारयिष्यते।

11. मानदोपाधि: दीक्षान्त-समारोहे विशेष-दीक्षान्त-समारोहे वा प्रदास्यते। एतदुपाधि: व्यक्तिगत-रूपेण अथवा अनुपस्थितौ च स्वीकर्तुं शक्यते।

12. दीक्षान्त समारोहे येभ्य: जनेभ्यः मानदा: उपाधय: प्रदेया: सन्ति, तेषां प्रस्तुति: कुलपतिना अथवा कुलपति-द्वारा नामितेन जनेन विधास्यते।

13. ***विश्वविद्यालय-द्वारा दीक्षान्त-समारोहे अभ्यर्थिन: निजोपाधीनाम् अनुरूपं निर्धारितं हस्तवेमयन्त्रविनिर्मितं परिधानं धारयित्वा औपचारिकीं वेशभूषां धारयिष्यन्ति। विश्वविद्यालय-द्वारा निर्धारिता समुचित-शैक्षणिक-वेशभूषा नैव धार्यते चेत् अभ्यर्थी दीक्षान्त-समारोहे प्रवेष्टुं नैव अनुमंस्यते।***

14. दीक्षान्त-समारोहे समनुष्ठीयमाना प्रक्रिया कुलपति-द्वारा अनुमोदितानां विनियमानाम् अनुसारं निर्धारयिष्यन्ते।

15. उत्तीर्णानां छात्राणां उपाधिपत्रेषु कुलपतिना हस्ताक्षराणि विधास्यन्ते तथा मानदेषु उपाधिपत्रेषु कुलाधिपतिद्वारा हस्ताक्षराणि करिष्यन्ते।

## श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालय:

## विश्वविद्यालयस्य उपाधय: (मानदोपाधिभिः सहिता:), डिप्लोमा, प्रमाणपत्रप्रदानविषये

### अध्यादेशक्रमाङ्क: 05

***(अधिनियमस्य धारा 2 (1) (iv) तथा 29 (1) (घ) इत्यस्य अन्तर्गतम्)***

1. सम्बद्धानाम् उपाधीनां /डिप्लोमा इत्यस्य/प्रमाणपत्राणां च प्रदानार्थम् अध्ययनस्य सर्वे कार्यक्रमा:/ पाठ्यक्रमा: च विश्वविद्यालय-द्वारा स्थापितै: सदनै:/विभागैः वा सञ्चालयिष्यन्ते ।

2. विश्वविद्यालय: समये समये विद्या-परिषद्-द्वारा निर्धारितानाम् आवश्यकतानाम् अनुसारं प्रत्येकेषु प्रकरणेषु अध्ययनस्य कार्यक्रमान्/पाठ्यक्रमान् च सफलतापूर्वकं सम्पूर्य उत्तीर्णेभ्य: छात्रेभ्य: उपाधीन्, डिप्लोमाप्रमाणपत्राणि च प्रदातुं शक्नोति।

3. **पाठ्यक्रमस्य अवधि:**

i. वर्षत्रयस्य स्नातकोपाधि-प्रदानार्थं पाठ्यक्रमस्य अवधि: षट्सु सत्रेषु वर्षत्रयं भविष्यति।

ii. पाठ्यक्रमस्य अवधि: दश सत्रेषु विस्तृतेभ्य: एकीकृत-कार्यक्रमेभ्य: पञ्चवर्षाणां भविष्यति, यस्मिन् वर्षत्रयस्य (षण्णां सत्राणां) अनन्तरं स्नातकोपाधि-प्रदानस्य विकल्प: भविष्यति।

iii. वर्ष-चतुष्टयस्य स्नातकोपाधि-प्रदानार्थं पाठ्यक्रमस्य अवधि: अष्ट सत्रात्मकः चतुर्वर्षीयः भविष्यति।

iv. प्रमाणपत्रीयाणां डिप्लोमा इत्येतेषां च कार्यक्रमाणाम् अवधि: विश्वविद्यालय-द्वारा निर्धारयिष्यते। समये समये च विद्या-परिषद्-द्वारा अनुमोदित: भविष्यति ।

v. स्नातकोत्तरोपाधि-प्रदानार्थं पाठ्यक्रमस्य अवधि: सत्र-चतुष्केषु विभक्त: वर्षद्वयात्मक: भविष्यति।

vi. स्नातकोत्तरोपाधि-प्रदानस्य पाठ्यक्रमस्य अवधि: सत्र-द्वये विभाजित: एकवर्षीय: भविष्यति।

vii. एम.फिल.इति विशिष्टाचार्यस्य पी.एच.डी. इति विद्या-वारिधे: च कार्यक्रमा: समये समये संशोधितानां विश्वविद्यालयानुदानायोगस्य नियमानाम् अनुसारं प्रवर्तयिष्यन्ते।

viii. एकस्मै छात्राय तत्सम्बद्ध-सदनस्य विभागस्य च सन्तुष्टये प्रत्येकस्मिन् विषये वस्तुत: आयोजितासु कक्षासु न्यूनान्न्यूनं 75% मिता उपस्थिति: आवश्यकी भविष्यति। अथ चोक्तासु सङ्गोष्ठीषु, सत्रेषु व्यावहारिकेषु अभ्यासेषु चापि प्रतिभागिताया: आवश्यकता भविष्यति या खलु निर्धारयितुं शक्यते।

अत्रैक: समय: अस्ति यत् विश्वविद्यालयस्य कुलपति: संकाय-प्रमुखस्य विभागाध्यक्षस्य वा अनुशंसायां समुचित-वैध-कारणेन समस्तोपस्थितौ प्रतिशतं पञ्च मिताधिकाम् अल्पतां मोचितुं शक्नोति।

एषोऽप्यत्र समय: अस्ति यत्, अतिरिक्त-सह-पाठ्यचर्यात्मकेषु कार्यक्रमेषु प्रतिभागितार्थं विश्वविद्यालय-द्वारा प्रतिनियुक्तेभ्य: छात्रेभ्य: उपरिप्रदत्तासु उपस्थिते: आवश्यकतासु शैथिल्यम् अतिरिच्य , यदि आवश्यकता स्यात् तदा 5% मितायां उपस्थितौ मुक्ति: प्रदास्यते। एतन्निभं शैथिल्यं छात्र-कल्याण-संकाय-प्रमुखस्य पूर्वानुमत्या यात्रा-समयं समेत्य कार्यक्रमेषु वास्तविकसहभागितानां दिवसेभ्य: एव उपलब्धं भविष्यति।

4. **प्रवेशार्थं पात्रता :**

विश्वविद्यालय-द्वारा प्रस्तावितेषु विभिन्न-पाठ्यक्रमेषु प्रवेशार्थम् अर्हता-मानदण्ड: विद्या-परिषदा उत वा समये समये अस्य उद्देश्यार्थं अधिकृतेन केनचिद् अन्येन निकायेन अनुमोदयिष्यते।

5. **अध्ययनस्य पाठ्यक्रमस्य पाठ्यचर्यायाश्च निर्माणम्**

i. अध्ययनस्य विषये पाठ्यक्रम: सम्बद्ध-विभागस्य अध्ययन-मण्डलस्य संस्तुतौ विद्या-परिषद्-द्वारा अनुमोदयिष्यते।

ii. अध्ययनस्य कार्यक्रमेभ्य: पाठ्यक्रमेभ्य: पाठ्यचर्याभ्यश्च पाठ्यक्रम-संरचना सम्बद्ध-विभागस्य अध्ययन-मण्डलस्य अनुशंसायां विद्या-परिषद्-द्वारा अनुमोदयिष्यते।

## 6. **विद्यार्थिनां कार्यक्रमेभ्य: पाठ्यक्रमेभ्यश्च निरसनम्**

विभाग-प्रमुखस्य अनुशंसायां सदनस्य संकाय-प्रमुख:, कुलपतये असन्तोषजनक-शैक्षणिक-प्रदर्शनस्य अथवा कदाचारस्य (यथा विनियमेषु नियममेषु च परिभाषितम्) तदाधारे कमपि छात्रं कस्मादपि कार्यक्रमात्/पाठ्यक्रमात् च अपाकर्तुं संस्तोतुं शक्नुवन्ति।

## 7. **मानदोपाधिप्रदानम्**

विद्या-परिषद: अनुशंसायाम् उपस्थितानां मतदान-कर्तृणां च न्यूनान्न्यूनं द्विगुणिततृतीयांशसदस्यानां बहुमतेन अनुमोदितप्रस्तावद्वारा कार्यपरिषद्, मानदोपाधीनां प्रदानाय अभ्यागताधिकारिणे प्रस्तावं दातुं क्नोति।

8. अत्रैक: समय: अस्ति यत् आपत्कालिक-स्थितौ कार्य-परिषद् स्वयमपि एतादृशं प्रस्तावं प्रस्तोतुं समर्हति। निम्नलिखिता: मानदोपाधय: कस्मैचिदपि जनाय अस्मिन् आधारे प्रदातुं शक्यन्ते यत् स जन: प्रतिष्ठित-पदेन उपलब्धिभि: च शिक्षाक्षेत्रे, सामाजिकक्षेत्रे च संस्कृत-शिक्षाया: प्रतिष्ठित-सेवानां च प्रचार-प्रसारयो: नैजं योगदानं ददाति। एतदुपाधि-प्राप्त्यर्थम् एक: उपयुक्त: योग्यः जन:-

- पारम्परिक-मनीषि-जनेभ्यः डॉक्टर ऑफ लिटरेचर (डी.लिट.) 'महामहोपाध्याय:' इत्युपाधिना आधुनिक-विद्वद्भ्यश्च 'वाचस्पति:' चेत्युपाधिना संस्कृत-वाङ्मयस्य प्रचार-प्रसारे तस्य विशिष्ट-योगदानार्थं सम्मानितः।

9. मानदोपाधिभि: सहिता: समेऽपि उपाधय: दीक्षान्तसमारोहे विशेष-दीक्षान्त-समारोहे वा वितरिष्यन्ते। इमे उपाधय: वैयक्तिक-रूपेण अथवा अनुपस्थितौ चापि ग्रहीतुं शक्यन्ते।

## श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालय:

## अन्य-विश्वविद्यालयेन/प्राधिकरणेन/संस्थानेन च साकं सञ्चालनार्थं/सहयोगाय विश्वविद्यालय-द्वारा मान्यताप्रदाने

## अध्यादेश-क्रमांक: 06

## अधिनियमस्य धारा 6 (1) (xii) इत्यस्य 29 (1) (ट) इत्यस्य चान्तर्गतम्

### I. प्रस्तावना

1. केन्द्रीय-संस्कृत-विश्वविद्यालयस्य, 2020वर्षीये अधिनियमे विश्वविद्यालय: केनचिदपि विश्वविद्यालयेन प्राधिकरणेन उच्चशिक्षण-संस्थानेन च साकं कार्यक्रम-सञ्चालनार्थं सहयोगकार्येषु सम्बद्धार्थं, येषु देशाद् बहिस्थितानि संस्थानानि अपि सम्मिलितानि सन्ति, विश्वविद्यालय-द्वारा निर्धारण-योग्य-उद्देश्येशेभ्य: उक्त-मान्यताया: सन्धेश्च प्रत्यावर्तनार्थम् अधिकृत: भविष्यति।"

2. अधिनियमे "अन्य-विश्वविद्यालयै:, संस्थानै: विद्वन्निकायै: सङ्घैश्च सहितै: अन्यै: अभिकरणै: साकमपि सहयोगार्थं सहयोग-पद्धते:" अध्यादेश-रचनार्थमपि प्रावधानं विहितमस्ति।

3. उपर्युक्ते सन्दर्भे, श्रीलालबहादुरशास्त्रि-राष्ट्रिय-संस्कृतविश्वविद्यालय: उच्चशिक्षाया: अन्येषां संस्थानानां चयनेन तै: साकं सहयोगस्य प्रस्तावं विदधाति, येषाम् अन्तिके ज्ञानस्य विभिन्न-शाखासु शिक्षाया: अनुसन्धानस्य च समृद्धीकरणस्य सुदृढीकरणस्य च मुख्य-क्षमता वर्तते। यानि च विश्वविद्यालयस्य उद्देश्यानाम् अग्रे वर्धनार्थं लाभप्रदानि सन्ति।

### II. मान्यतार्थम् अर्हता

1. एतन्निभानि संस्थानानि येषां पार्श्वे शिक्षणस्य अनुसन्धानस्य च क्षेत्रे सिद्धता, उत्कृष्टता शैक्षणिक-क्षमता च विद्यन्ते, समर्हणीयताया: आभिलेख्या कीर्तिमत्ता अस्ति, तानि संस्थानानि विश्वविद्यालयेन समं सहयोगार्थं मान्यतार्थम् उद्देश्यपूर्णार्थं च भाजनीभूतानि भविष्यन्ति।

तत्रापि एक: समय: वर्तते यत् एतादृशानि संस्थानानि भारत-स्थितानि विदेश-स्थितानि कुत्रापि वा स्थितानि भवेयुः। अथ च एते निकाया: प्रशासन-साहाय्य-पोषितानि भवेयुः उत वा प्रशासनेतरै: अभिकरणै: वित्त-साहाय्य-पोषणीयाः स्युः।

2. सिद्धोत्कृष्टताया: शैक्षणिक-क्षमताया: च मूल्याङ्कनम्, अन्यविषयान् अतिरिच्य, निम्नलिखितेन आधारेण करिष्यते:

i. संस्थानेन एतादृशस्य सहयोगस्य कृते यूजीसीति विश्वविद्यालयानुदानायोग-द्वारा अथ च अन्य-शीर्ष निकाय-द्वारा निर्धारितानां दिङ्निर्देशानाम् अनुसारेण सर्वे मानदण्डा: पात्रता च पूरणीया: भविष्यन्ति।

ii. संस्थानस्य अन्तिके अनुसन्धानस्य उद्देश्यार्थम् आवश्यक-प्रयोगशाला: सुविधा: पुस्तकालयेन साकं नैजं भवनमपि भवेत्, सहैव पुस्तकालये पर्याप्त-सङ्ख्यायां शोध-पत्रिकाभिः, सन्दर्भ-पुस्तकैः, अन्तार्जाल-सुविधाभि: साकं च उन्नत-पाठ्यपुस्तक- सङ्ग्रहाः, देश-विदेशानाम् उच्च-शैक्षणिक-संस्थानेषु / विश्वविद्यालयेषु उपयुज्यमानानीव तादृशानि आधुनिकोपकरणानि / सौविध्यानि वा भवेयुः।

iii. संस्थानस्य पार्श्वे अनुसन्धान-कार्यकलापानां वित्त-साहाय्य-पोषणार्थं पर्याप्त-वित्तीय-संसाधनानि भवेयुः।

## III. मान्यतार्थम्, मान्यताया: नवीकणार्थञ्च प्रक्रिया

1. एतन्निभम् संस्थानं यद् विश्वविद्यालयेन साकं संयोजितुम् इच्छति, तेन आलेखांशस्य 2 (1) इत्यस्य समर्थने विवरण-प्रपत्रकै: साकं निर्धारिते प्रारूपे विश्वविद्यालयाय लिखित-रूपेण नैजम् अभिप्रेतं प्रस्तोतव्यं भविष्यति।

2. एतादृशा: सर्वे अनुरोधा: कुलसचिवेन सम्प्राप्स्यन्ते, विश्वविद्यालयस्य संकाय-प्रमुखस्य प्रोफेसर इत्याचार्याणाञ्च एकस्या: समिते: समक्षं ते अनुरोधा: प्रस्तोष्यन्ते, येषाम् संरचना निम्नलिखिता भविष्यति। एतस्योपवेशनम् सामान्यत: प्रतिवर्षं वारद्वयं भविष्यति: -

| | |
|---|---|
| कुलपति: | -अध्यक्ष: |
| सर्वेषां सदनानां संकायप्रमुखा: | -सदस्य: |

सम्बद्ध-विभागानां प्रमुखा:, सर्वे आचार्या: येषां शिक्षण-क्षेत्रे प्रस्तावित: सहयोग: विधेय: अस्ति।

-सदस्य:

कुलसचिव: -सदस्य-सचिव:

50% सदस्यानां सम्मेलनार्थम् अनिवार्योपस्थितिः।

सर्वे निर्णया: उपस्थितानां सदस्यानाम् मध्ये 75% मितसर्वसम्मत्या भविष्यति।

3. उपर्युक्त-समित्या प्राप्तानुरोधेषु विचार: करिष्यते। समितिरेव मान्यतार्थं कुलपते: पुरत: प्रकरणमिदं संस्तोष्यति। येन संस्थान-विश्वविद्यालय-द्वारा प्रबल-रूपेण प्रतिपादितानां तथ्यानां भौतिक-निरीक्षणार्थं सत्यापनार्थं च त्रि-सदस्यीय-समिति: नामिता करिष्यते।

4. एषा त्रि-सदस्यीय-समिति: विश्वविद्यालयस्य निधे: व्ययेन संस्थानस्य यात्रां करिष्यति उपरि-प्रतिपादितस्य द्वितीयस्य आलेखांशस्य मापदण्डानाम् आधारेण मान्यताया: प्रकरणस्य आकलनार्थं संस्थानस्य भौतिक-रीत्या सत्यापनं करिष्यति। एतद्-विधानानन्तरं, एषा नैजीं विवरणिकां समितये समर्पयिष्यति या खलु पुन: कुलपतये उचित-रीत्या अनुशंसां करिष्यति। एषा निज-सम्मर्श-सहितं प्रकरणस्य निर्णयार्थम् एतद् वैधानिकानाम् अधिकारिणां समक्षं सम्प्रस्तोष्यति।

5. प्रदत्ता मान्यता सामान्य-दृशा पञ्चवर्षत: अधिका न भविष्यति, अथ च मध्यावधि-समीक्षाया: अधीने भविष्यति, समीक्षाया: पद्धति: समयश्च विश्वविद्यालय-द्वारा विनिश्चेष्यते।

6. मान्यतेयं पञ्च वर्षाणाम् अनन्तरं पञ्च-पञ्च वर्षाणाम् आगामि-कार्यकालार्थं वर्धितुं शक्ष्यते ।

1. अत्रापि समयोऽस्ति यत् केवलं मान्यताया: अवधे: समाप्ते: कारणेन प्रख्यापितेषु दिङ्निर्देशेषु अनुसन्धान-कार्यक्रमेषु च किमपि व्यवधानं नैव क्षेपिष्यते।

2. एषोऽपि समयोऽस्ति यत् सामान्यत: मान्यताया: अवधे: अन्तिम-षण्णां मासानाम् अवसरे विश्वविद्यालय-द्वारा अनुसन्धानस्य अनुदेशात्मकस्य च सत्रस्य प्रारम्भस्य कृते किमपि नवीनं पञ्जीकरणं नैव समारप्स्यते।

7. मान्यताया: पुनः मान्यतार्थं नवीकरणार्थं च अनुरोध: अवधि-समाप्ते: दिनाङ्कात् न्यूनान्न्यूनम् षण्णां मासानाम् पूर्वमेव प्राप्त: भवेत्, अथ च पूर्वत: एव उपरि-वर्णितप्रक्रियाया: अनुसारम् अन्वीक्षणं करिष्यते।

8. यदि पश्चवर्ति-चरणेषु प्रदत्तेषु-तथ्येषु कापि त्रुटि: प्राप्यते अथवा किमपि एतादृशं तथ्यं समक्षम् आयाति येन शैक्षणिक-प्रतिष्ठाया: सन्दर्भे संस्थानस्य विश्वसनीयता आचरणं वा हीयते चेत्, तदा विश्वविद्यालयस्य पार्श्वे उक्त-मान्यताया: तत्काल-प्रभावेण निरसनस्य अधिकार: सुरक्षित: भविष्यति।

9. सर्वे विधि-सम्मता: विवादा: नव-दिल्ल्या: न्यायालयानां क्षेत्राधिकारस्य अधीना: भविष्यन्ति ।

## IV. सहसञ्चालनस्य सहयोगस्य वा पद्धति: अन्यविवरणानि च

1. विश्वविद्यालय: अनुदेशस्य अनुसन्धानस्य उत वा उद्देश्य-द्वयस्यापि कृते केनापि संस्थानेन समं सहयोगस्य प्रचयनं कर्तुं सक्षमते।

2. तत्रैक: समय: वर्तते यद् उपर्युक्ते कस्मिन्नपि प्रकरणे, वर्तमानानां नियमानां दिङ्निर्देशानां अनुसारं विश्वविद्यालय-द्वारा छात्रेभ्यः प्रवेश: प्रदास्यते परीक्षा चापि स्वीकरिष्यते।

3. विश्वविद्यालय-द्वारा शुल्क-निर्धारणं एकत्रीकरणं च करिष्यते येन परस्परं साहमत्यस्य अनन्तरं संस्थान-द्वारा समान-रूपेण विनिमयीकर्तुं शक्येत ।

4. विश्वविद्यालय-द्वारा समये समये संशोधित-नियमानां विनियमानां चानुसारेण मार्गदर्शकानाम् अनुसन्धान-पर्यवेक्षकाणाञ्च नियुक्ति: मान्यता-प्रदानं वा विधास्यते ।

5. यदि संस्थानस्य कश्चिदपि शिक्षक: अनुसन्धानस्य अनुदेशस्य चावधि-मध्ये सेवानिवृत्तो जायते, चेत् तदीय-सेवानाम उपयोग: सामान्यत: सत्रान्तं यावत् करिष्यते, तदनन्तरं विश्वविद्यालय-द्वारा उपयुक्तं प्रतिस्थापनं करिष्यते।

6. एष: सहयोग: अध्ययन-पाठ्यक्रमस्य कस्मैचिदपि भागाय अथवा प्रश्नपत्रार्थं च भवितुं शक्नोति।

7. संस्थाने छात्राणां शोधार्थिनां च एकस्य समूहस्य अवधे: निश्चय: कुलपते: अनुमोदन-पुरस्सरं सम्बद्ध-विभागस्य संकायप्रमुखेण करिष्यते। यद्यपि छात्र-समूहस्य निवासाय अधिकतमावधि: निम्नानुसारं विनियमितो भविष्यति:

| | |
|---|---|
| पञ्च वर्षेभ्यः एकीकृतस्य पी.एच.डीति पाठ्यक्रमस्य च कृते | 3 अनिरंतर सत्राणि |
| 3/4 वर्षाणां यूजीसीति स्नातकीय-पाठ्यक्रमस्य कृते | 2 अनिरंतर सत्रे |
| पी/जी. परास्नातकीय-पाठ्यक्रमस्य कृते | 2 अनिरंतर सत्रे |

उपरि प्रोक्तेषु विषयेषु विशेष-रूपेण नैव सम्मिलितानि कानिचिदपि प्रकरणानि समये समये संशोधितानां विश्वविद्यालयस्य नियमानाम् अनुसारेण विनिमयीकरिष्यते।

## श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः

## विश्वविद्यालयस्य सर्वेभ्यः उपाधिभ्यः, डिप्लोमा-कृते प्रमाणपत्रेभ्यश्च अध्ययनपाठ्यक्रमे

### अध्यादेशक्रमाङ्कः 07

### अधिनियमस्य धारा 6 (1)(झ) इत्यस्य 29 (1)(ख) इत्यस्य चान्तर्गतम्

1. विश्वविद्यालयद्वारा विनिश्चितेषु, समये समये सक्षम-निकाय-द्वारा अनुमोदितेषु विभिन्नेषु सदनेषु विभागेषु च उपाधि-कृते, डिप्लोमा-कृते प्रमाणपत्राणां च कृते विश्वविद्यालये अध्ययनार्थं कार्यक्रमाः पाठ्यक्रमाः च भविष्यन्ति।

अत्रेदं ध्येयमस्ति यत् विश्वविद्यालय-द्वारा प्रदीयमानाः उपाधयः यूजीसी इत्यस्य 1956 तम-वर्षीयस्य अधिनियमस्य धारा 22(3) इत्यस्य अन्तर्गतं निर्दिष्टायां यथाकालं संशोधितोपाधीनां सूच्यां भविष्यन्ति।

एते सर्वेऽपि प्रस्ताविताः कार्यक्रमाः पाठ्यक्रमाश्च विश्वविद्यालयस्य नियमानाम् अनुसारेण सञ्चालयिष्यन्ते ।

2. उपरि प्रतिपादितम् अतिरिच्य, विद्या-परिषदः पार्श्वे सदनस्य सम्बद्धविभागस्य च अध्ययन-मण्डलस्य अनुशंसायां कस्यचिदपि कार्यक्रमस्य प्रारम्भस्य, कर्यक्रम-संशोधनस्य, पिधानस्य च शक्तिः भविष्यति।

3. न्यूनतम-पात्रतायां आवश्यकतासु आवण्टितेषु आसनेषु च प्रदत्तानाम् अङ्कानां प्रतिशतता समये समये विद्या-परिषदा अनुमोदयिष्यते।

4. न्यूनतम-पात्रतायाः समयेषु विश्वविद्यालय-द्वारा निर्धारितानि उपाधि/डिप्लोमा/प्रमाणपत्राणि च तेषां विश्वविद्यालयानां/संस्थानानां/मण्डलानां च भविष्यन्ति ये विश्वविद्यालय-द्वारा मान्यता-प्राप्ताः सन्ति ।

एतस्मिन् अध्यादेशे कस्यचिदपि तथ्यस्य निहिते सत्यपि कुलपति: काठिन्य-दूरी-करणे अथवा कस्यापि अन्यस्य असाधारणस्य प्रकरणस्य समाधानार्थम् आवश्यकान् उपायान् कर्तुं शक्नोति।

## श्रीलालबहादुरशास्त्रिराष्ट्रीयसंस्कृतविश्वविद्यालयः

## विश्वविद्यालयपरीक्षाणां सम्बन्धे छात्रेषु अनुशासनमालक्ष्य

## अध्यादेशक्रमाङ्कः 08

## अधिनियमस्य धारा 6 (1) (xxviii) 29 (1) (छ) चान्तर्गतम्

I. विश्वविद्यालयस्य सेमेस्टर/सत्रसमाप्तौ आयोजितपरीक्षाः

1. सेमेस्टर/सत्रस्य अन्ते करणीयाः परीक्षाः सम्बद्धपरीक्षाकेन्द्रस्य अधीक्षकस्य सामान्यनिरीक्षणे सञ्चालिताः भविष्यन्ति। परीक्षायाः न्यायपूर्णं व्यवस्थितं च संचालनं तस्य दायित्वं भविष्यति।

2. अनुचितसाधनस्य प्रयोगे ज्ञाते (यथा अधोलिखितसामान्यदिङ्निर्देशायाः प्रथम-खण्डे निर्दिष्टम्) तत् परीक्षानियन्त्रकस्य सूचनायां आनयिष्यते, यः खण्डस्य अन्तर्गतनिर्दिष्टानुसारं अग्रे कार्यवहनाय कुलपतिं प्रति तस्य पूर्णां विज्ञप्तं दास्यति। सामान्यदिङ्निर्देशाः अधः दत्ताः सन्ति-

II. प्रवेशपरीक्षा

1. प्रवेशपरीक्षायाः समये अभ्यर्थिनः केन्द्रस्य परीक्षाधीक्षकस्य अनुशासनात्मकनियन्त्रणे भविष्यन्ति यः आवश्यकनिर्देशान् प्रसारयिष्यति। यदि कश्चन अभ्यर्थी पर्यवेक्षककर्मचारिणां कस्यचित् सदस्यस्य वा केन्द्रे कस्यापि निरीक्षकस्य वा निर्देशानां अवज्ञां करोति दुर्व्यवहारं वा करोति तर्हि तस्य सत्रस्य परीक्षायां सः/सा निष्कासितः/निष्कासित भवितुम् अर्हति।

2. परीक्षाधीक्षकः तत्क्षणमेव एतादृशप्रकरणस्य तथ्यं प्रमाणस्य पूर्णविवरणेन सह परीक्षानियन्त्रकं प्रति सूचयिष्यति यः अधोलिखितानां सामान्यदिङ्निर्देशानां खण्ड 4 इत्यस्य दृष्ट्या विषयं परीक्षा अनुशासनसमित्याः समीपं प्रस्थापयिष्यति। समितिः कुलपतिं प्रति यथायोग्यम् आनुशासनिककार्यनिर्वहनाय अनुशंसां करिष्यति यथा खण्डस्य ७ अन्तर्गतं निर्दिष्टम्।

1. हर दिन, परीक्षा शुरू होने से पहले, पर्यवेक्षक सभी अभ्यर्थियों से उनके कर्मियों, टेबल, डेस्क आदि की तलाशी लेने के लिए कहेंगे और उनसे सभी कागजात, किताबें, नोट्स या अन्य संदर्भ सामग्री सौंपने के लिए कहेंगे जो उन्हें अपने पास या परीक्षा हॉल में रखने की अनुमति

नहीं है। जब देर से आने वाले को प्रवेश दिया जाता है, यह चेतावनी परीक्षा हॉल में प्रवेश के समय उसे दोहराई जाएगी। उन्हें यह भी देखना है कि प्रत्येक अभ्यर्थी के पास अपना पहचान पत्र और हॉल टिकट हो।

3.प्रतिदिनं परीक्षायाः प्रारम्भात् प्राक् पर्यवेक्षकः कर्मिणः/अभ्यर्थिनः च प्रति तेषां टेबल-डेस्क इति मञ्चानाम् आसन्दिकानां च अन्वेषणाय वदिष्यति तांश्च सर्वाणि पत्र-पुस्तकादीनीति सर्वां तादृशीं सामग्रीं समर्पयितुं कथयिष्यति यस्याः स्वपार्श्वे अथवा परीक्षाभवने सन्धारयितुं अनुमतिर्नास्ति। यदा विलम्बेन आगच्छते प्रवेशानुमतिः दास्यते तदा अपि सावधानतेयं पुनरपि उच्चारयिष्ते। पर्यवेक्षकेण एतदपि द्रष्टव्यं यत् प्रत्येकस्य अभ्यर्थिनः पार्श्वे स्वस्यपरिचयपत्रं, परीक्षाभवनप्रवेशपत्रं च अस्ति।

III. सामान्यदिङ्निर्देशाः

1. अनुचितसाधनप्रयोगः

अभ्यर्थी परीक्षायां अनुचितसाधनानाम् उपयोगं न कुर्यात् ।

निम्नलिखितानि अनुचितसाधनानि स्युः

क. सम्बद्धपरीक्षायाः विषयेण सह सम्बद्धा/असम्बद्धा आपत्तिजनकसामग्री प्राप्ता।

ख. स्वस्वामित्वे विद्यमानसामग्रीतः अन्यस्मात् अभ्यर्थिनः वा अनुकृतिं कुर्वन्/कुर्वन्ती प्राप्ती।

ग. उत्तरपुस्तिकानां आदानप्रदानम्।

घ. प्रतिलिपिकरणार्थं आसनस्य परिवर्तनम्।

ङ. अन्येषां अभ्यर्थिनां साहाय्यं कर्तुं प्रयतमानो/प्रयतमाना दृश्यते।

छ. अन्यैः अभ्यर्थिभिः सह सम्भाषणं कुर्वन्/कुर्वन्ती दृश्यतेय़

छ .उत्तरपुस्तिकानां वा प्रासंगिकसामग्रीणां वा आदानप्रदानम्।

ज. मुख्योत्तरपुस्तिकायाम् अन्यस्य कस्यचित् अभ्यर्थिनः पञ्जीकृतसङ्ख्यां लिखित्वा लेखनम्।

झ. पूर्वलिखितोत्तरपुस्तकानां (मुख्यपुस्तिकायाः अतिरिक्तपत्रस्य वा) प्रयोगः।

ञ. परीक्षाकेन्द्राधीक्षकस्य विज्ञप्तेरनुसारं निरीक्षकस्य तर्जनम् अनादरो वा।ट.परीक्षायां ट. प्रश्नानाम् उत्तरं दातुं निरीक्षकेण सह परामर्शकरणम्।

ठ. प्रतिरूपणप्रकरणानि।

ड. अनुकृतिकरणं सामूहिकानुकृतिकरणं वा।

ढ. कदाचारस्य प्रयोजनार्थं इलेक्ट्रॉनिकयन्त्राणाम् उपयोगः।

सर्वासां परीक्षाणां विषये कार्यकारिपरिषद् कस्यापि कृत्यस्य निरसनं कर्तुं वा किमपि अन्यं कृत्यम् अनुचितसाधनं घोषयितुं शक्नोति।

2. यदि कुलपतिः सन्तुष्टः अस्ति यत् केन्द्रविशेषेषु प्रचण्डप्रतिलिपिः अथवा अनुचितसाधनानाम् अत्यधिकप्रयोगः अभवत् तर्हि सः परीक्षां निरस्तां कृत्वा सम्बद्धानां सर्वेषां अभ्यर्थिनां पुनःपरीक्षायाः आदेशं दातुं शक्नोति

3. यत्र प्रभारी निरीक्षकः सन्तुष्टः भवति यत् तृतीयांशाः (1/3) अधिकाः वा छात्राः परीक्षाभवने विशेषेण अनुकृतिकरणम् अनुचितसाधनां वा प्रयोगं कृतवन्तः, तत्र सामूहिकानुकृतिप्रकरणरूपेण व्यवहरिष्यते।

१) यत्र परीक्षायां अनुचितसाधनस्य प्रयोगस्य शङ्का भवेत् अनुचितसाधनं प्राप्तं वा तेन सह तत्र परीक्षाकेन्द्रे परीक्षाधीक्षकः परीक्षानियन्त्रकं प्रति विलम्बं विना तथा सम्भवे सति घटनादिने तां विज्ञप्तिं दास्यति, यस्यां प्रत्येकस्य प्रकरणस्य समर्थने प्रमाणस्य पूर्णविवरणं भविष्यति। एतस्य समर्थने सम्बद्धस्य अभ्यर्थिनः विवरणं यदि अस्ति, तस्यापि परीक्षानियन्त्रकेण प्रदत्ते प्रपत्रे प्रविष्टिः स्यात्।

२) कोऽपि अभ्यर्थी वक्तव्यं दातुं बाध्यः न भविष्यति, परन्तु तस्य वक्तव्यं दातुं अस्वीकरणस्य तथ्यं परीक्षाधीक्षकेण अभिलेखितं भविष्यति तथा च प्रकरणस्य सत्यापनम् पर्यवेक्षककर्मचारिणाम् अन्याभ्यां द्वाभ्यां सदस्याभ्यां तस्य सत्यापनं करिष्यते।

३) यदि परीक्षायाम् अनुचितसाधनस्य प्रयोगस्य शङ्का ज्ञायते तर्हि अभ्यर्थिनः प्रश्नपत्रस्य उत्तरं दातुं शक्नुवन्ति, परन्तु पृथक् उत्तरपुस्तिकायाम्। यस्याम् उत्तरपुस्तिकायाम् अनुचितसाधनानाम् उपयोगः कृतः इति शङ्का भवति सा परीक्षाधीक्षकेण स्वायत्तीकरिष्यते स च उत्तरपुस्तिकाद्वयं स्वविज्ञप्त्या सह परीक्षानियन्त्रकं प्रति प्रेषयिष्यति। एतेन शेषपरीक्षासु उपस्थितिसम्बन्धे अभ्यर्थिनि प्रभावः न भविष्यति।

४) केन्द्राधीक्षकेन, परीक्षकेन, मूल्याङ्कनकर्त्रा, संचालकेन, सारणीनिर्मात्रा वा विश्वविद्यालयपरीक्षायाः सह सम्बद्धेन सर्वेणापि जनेन अनुचितसाधनानाम् उपयोगस्य सर्वेषां प्रकरणानाम् सूचनां तत्क्षणमेव सर्वाभिः प्रासंगिकसामग्रीभिः सह परीक्षानियन्त्रकं प्रति सूचितं कर्तव्यं भविष्यति।

4. परीक्षानुशासनसमितिः

1. अनुचितसाधनस्य कथितप्रयोगस्य सर्वाणि प्रकरणानि कुलपतिद्वारा सङ्घटितां परीक्षानुशासनसमितिं प्रति प्रेषयिष्यन्ते।

2. समित्यां विश्वविद्यालयस्य शिक्षकेषु अधिकारिषु च पञ्च सदस्याः भविष्यन्ति। तेषु एकः सदस्यः कुलपतिना अध्यक्षत्वेन नामाङ्कितः भविष्यति।

3. सदस्यस्य नियुक्तिः वर्षद्वयस्य कृते भविष्यति, स च पुनः नियुक्त्यर्थं योग्यः भविष्यति।

4. सम्मेलनगणपूर्तये त्रयाणां सदस्यानाम् उपस्थितिः अपेक्षिष्यते।

5. सामान्यतया सर्वे निर्णयाः समितिद्वारा सरलबहुमतेन गृहीताः भविष्यन्ति। यदि सदस्याः सहमतिम् प्राप्तुं असमर्थाः भवेयुः तर्हि विषयः कुलपतिं प्रति प्रेषयिष्यते, तस्य च निर्णयः अन्तिमः भविष्यति ।

6. परीक्षानुशासनसमित्या गृहीताः सर्वे निर्णयाः अनुमोदनार्थं कुलपतेः समक्षं स्थापिताः भविष्यन्ति।

विश्वविद्यालयस्य निर्णयस्य प्राप्तेः दिनाङ्कात् एकमासस्य अन्तः अभ्यर्थी प्रकरणस्य समीक्षायै कुलपतिं प्रति लिखितरूपेण आवेदनं कर्तुं शक्नोति। यदि कुलपतिः सन्तुष्टः अस्ति यद् आवेदनं विचारणीयम् अस्ति तर्हि सः पुनर्विचारार्थं परीक्षानुशासनसमितिं प्रति पुनः विषयं प्रेषयितुं शक्नोति।

5. परीक्षानुशासनसमितिः अनुचितसाधनप्रकरणेषु निम्नलिखितदण्डेषु एकस्य अनुशंसां कर्तुं शक्नोति।

| **अनुचितसाधनानां प्रकृतिः** | **दण्डस्य स्तरः** |
|---|---|
| चेद् अभ्यर्थी खण्डस्य ३ उपखण्डेषु (क) तः (छ) पर्यन्तं उल्लिखितानां अनुचितसाधनानाम् उपयोगं कृतवान्। | तस्मिन् सत्रे अभ्यर्थिनः पंजीकृताः सर्वाः विश्वविद्यालयपरीक्षाः निरस्तीकरणीयाः। |
| चेद् अभ्यर्थी खण्डस्य ३ उपखण्डेषु (क) तः (छ) पर्यन्तं उल्लिखितानां अनुचितसाधनानाम् पुनरावृत्तिं कृतवान् । | तस्मिन् सत्रे अभ्यर्थिनः पंजीकृताः सर्वाः विश्वविद्यालयपरीकक्षाः निरस्तीकरणीयाः सः/सा च आगामिपरीक्षासत्रस्य सर्वाभ्यः परीक्षाभ्यः वञ्चितः/वञ्चिता करणीयः/करणीया |
| चेद् अभ्यर्थी खण्डस्य ३ उपखण्डेषु (क) तः (छ) पर्यन्तं उल्लिखितानां अनुचितसाधनानाम् तृतीयानुवृत्तिं कृतवान् । | तस्मिन् सत्रे अभ्यर्थिनः पंजीकृताः सर्वाः विश्वविद्यालयपरीकक्षाः निरस्तीकरणीयाः। सः/सा च विश्वविद्यालयस्य परीक्षासु पञ्जीकरणात् उपस्थितेः च निरोधव्यः/निरोधव्या। |
| चेद् अभ्यर्थिभिः खण्डस्य ३ उपखण्डेषु (ज) इत्युपखण्डस्य अनुचितसाधनानाम् उपयोगः कृतः। | केवलं तस्मिन् सत्रे अभ्यर्थिना पञ्जीकृताः सर्वविषयाणां विश्वविद्यालयपरीक्षाः निरस्तीकरणीयाः। |

| | |
|---|---|
| चेद् अभ्यर्थिभिः खण्डस्य ३ उपखण्डेषु (झ) इत्युपखण्डस्य अनुचितसाधनानाम् उपयोगः कृतः। | तस्मिन् सत्रे अभ्यर्थिना पञ्जीकृताः सर्वविषयाणां विश्वविद्यालयपरीक्षाः निरस्तीकरणीयाः। आगामिपरीक्षासत्रद्वयस्य कृते सः/सा च प्रतिबन्धितः/प्रतिबन्धिता करणीयः/करणीया। |
| चेद् अभ्यर्थिभिः खण्डस्य ३ उपखण्डेषु (ञ) इत्युपखण्डस्य अनुचितसाधनानाम् उपयोगः कृतः। | तस्मिन् सत्रे अभ्यर्थिना पञ्जीकृताः सर्वविषयाणां विश्वविद्यालयपरीक्षाः निरस्तीकरणीयाः। आगामिपरीक्षासत्रद्वयस्य कृते सः/सा च प्रतिबन्धितः/प्रतिबन्धिता करणीयः/करणीया उपस्थितेः च वर्षद्वयाय वारणीयः। |
| चेद् अभ्यर्थिभिः खण्डस्य ३ उपखण्डेषु (ट) इत्युपखण्डस्य अनुचितसाधनानाम् उपयोगः कृतः। | तस्मिन् सत्रे अभ्यर्थिनः पंजीकृताः सर्वाः विश्वविद्यालयपरीक्षाः निरस्तीकरणीयाः। |
| चेद् अभ्यर्थिभिः खण्डस्य ३ उपखण्डेषु (ठ) इत्युपखण्डस्य अनुचितसाधनानाम् उपयोगः कृतः। | तस्मिन् सत्रे अभ्यर्थिना पञ्जीकृताः सर्वविषयाणां विश्वविद्यालयपरीक्षाः निरस्तीकरणीयाः। आगामिपरीक्षासत्रद्वयस्य कृते सः/सा च प्रतिबन्धितः/प्रतिबन्धिता करणीयः/करणीया उपस्थितेः च वर्षद्वयाय वारणीयः। एतदतिरिच्य, चेत् कश्चिद् बाह्यजनः संलिप्तः तर्हि सम्बद्धा वैधानिकी प्रक्रिया प्रारप्स्यते। |

| | |
|---|---|
| चेद् अभ्यर्थिभिः खण्डस्य ३ उपखण्डेषु (ड) इत्युपखण्डस्य अनुचितसाधनानाम् उपयोगः कृतः। | ix) क) एकस्मिन् परीक्षाभवने : तत्परीक्षाभवनने छात्रैः प्रदत्ता संयुक्ता परीक्षा निरस्तीकरणीया। सम्बद्ध भवनस्य अधीक्षकः प्रत्यक्षरूपेण अप्रत्यक्षरूपेण वा सम्मिलिताः अन्ये जनाः अग्रिमेभ्यः षट् परीक्षासत्रेभ्यः निरीक्षणात् प्रश्नपत्रनिर्माणात्, मूल्याङ्कनादिपरीक्षाकार्येभ्यः प्रतिबन्धिताः करणीयाः।<br><br>ख) कस्मिंश्चित् केन्द्रे: केन्द्रस्य छात्रैः प्रदत्ता संयुक्ता परीक्षा निरस्तीकरणीया। परीक्षाभवनस्य पर्यवेक्षकाः केन्द्राधीक्षकाः च प्रत्यक्षरूपेण अप्रत्यक्षरूपेण वा सम्मिलिताः अन्ये जनाः अग्रिमेभ्यः षट् परीक्षासत्रेभ्यः निरीक्षणात् प्रश्नपत्रनिर्माणात्, मूल्याङ्कनादिपरीक्षाकार्येभ्यः प्रतिबन्धिताः करणीयाः। |

**श्रीलालबहादुरशास्त्रिराष्ट्रीयसंस्कृतविश्वविद्यालयः**

**परीक्षाणां/उपाधीनां मान्यतायै समतुल्यतासमितिमालक्ष्य**

**अध्यादेशक्रमाङ्कः 09**

**(अधिनियमस्य धारा 6 (1) (xxviii) 29 (1) (0) चान्तर्गतम्)**

तत्र निम्नलिखितसदस्यानां समतुल्यतासमितिः भविष्यति।

1. कुलपतिः अथवा तेन नामाङ्कितः जनः — अध्यक्षः

2. सम्बद्धविद्यालयस्य संकायप्रमुखः — सदस्यः

3. कुलपतिना विद्यालयानां संकायप्रमुखद्वयम्
   नामाङ्कितं भविष्यति — सदस्यौ

4. कुलपतिना नामाङ्कितः बाह्यविशेषज्ञः — सदस्यः

5. विद्या(शैक्षणिक)-परिषद्द्वारा स्वसदस्येषु
   एकः जनः त्रीणि वर्षाणि यावत् नामाङ्कितः भविष्यति — सदस्यः

6. परीक्षानियन्त्रकसदस्यः — सदस्यः

7. कुलसचिवः — सचिवः

कार्यम्

अस्याः समितेः कार्याणि भविष्यन्ति :- .

1. विदेशीयविश्वविद्यालयैः अपि सहितं समये समये निर्दिष्टानां परीक्षाणां/उपाधीनां समतुल्यतायाः परीक्षणं शैक्षणिकपरिषदं प्रति अनुशंसनं च ।

2. अन्यविश्वविद्यालयैः अन्यैः परीक्षासंस्थाभिः च क्रियमाणानां परीक्षाणां महत्त्वं ज्ञानं निर्धारणं च ।

3. प्रवेशार्थं समये समये निर्दिष्टानां परीक्षाणां योग्यतानां च समतुल्यतानां निर्धारणं अथ च

4. यथासमयं समुचितज्ञातकारणैः कस्याः अपि परीक्षायाः/उपाधेः निरोधनस्य निलम्बनस्य निरस्तीकरणस्य मान्यताप्रदानस्य समीक्षणं शैक्षणिकपरिषदं प्रति अनुशंसाकरणं च।

5. विशेषप्रसङ्गेषु यदि कुलपतिः सन्तुष्टः अस्ति तर्हि सः अन्यविश्वविद्यालयानाम्/संस्थानां कस्याः अपि परीक्षायाः/योग्यतायाः समकक्षं/मान्यतां एकवर्षस्य अवधिपर्यन्तं प्रदातुं शक्नोति तथा च कार्यवाहिकां समितिं प्रति तत् निवेदयिष्यते या निर्णयस्य नैरन्तर्यं करणीयं न वा इति विचारयितुं शक्ष्यति।

6. समितिः यत्र यत्र आवश्यकं तत्र तत्र विषयविशेषज्ञं आमन्त्रयितुं शक्नोति यः तस्य कार्ये सहायतां कर्तुं शक्नोति।

7. समितिः स्वस्य कार्यानुष्ठानस्य प्रक्रियां निर्धारयितुं शक्नोति। शैक्षणिकपरिषदः अनुमोदनेन परीक्षाणां/योग्यतानाम् अनुसारं समतुल्यतां अथवा मान्यतां निर्धारयितुं दिङ्निर्देशान् प्रारूपयिष्यति।

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**परीक्षाणाम्/उपाधीनां मान्यताहेतोः छात्रानुशासनम् आलक्ष्य**

**अध्यादेशसङ्ख्या 10**

**अधिनियमस्य धारा 6 (1) (xxviii) अथ च 29 (1) (ण) अन्तर्गतम्**

1. अनुशासनन्तर्गतं विश्वविद्यालयस्य छात्रैः सदाचरणस्य व्यवस्थितव्यवहारस्य च पालनम् सम्मिलितमस्ति;

2. विश्वविद्यालयेन समये समये निर्मितानाम् निम्नलिखितनियमादीनाम् विश्वविद्यालयस्य छात्रैः दृढतया पालनं करिष्यते;

2.1 विश्वविद्यालयस्य प्रत्येकं छात्रः अनुशासनं निर्वहेत्, सर्वेषु स्थानेषु शिष्टाचारपूर्वकं व्यवहारं कर्तुं स्वकर्तव्यं जानीयात्;

2.2 कोऽपि छात्रः विश्वविद्यालयस्य छात्राणां कृते "सीमातः बहिः" इति घोषितस्थानानि क्षेत्राणि वा न गच्छेत्;

2.3 प्रत्येकं छात्रः सर्वदा सक्षमप्राधिकारिणा प्रसारितं परिचयपत्रं सन्धारयेत्;

2.4 प्रत्येकं छात्रः, यस्य परिचयपत्रं प्रसारितं, सः विश्वविद्यालयेन यदा आवश्यकं भवेत् तदा परिचयपत्रं प्रदर्शनीयं समर्पणीयं वा भविष्यति;

2.5 यः कोऽपि छात्रः अनुकरणस्य अथवा मिथ्यानाम्नः दोषी भवेत् सः अनुशासनात्मककार्याणां कृते उत्तरदायी भविष्यति;

2.6 परिचयपत्रस्य हानिः, यथा यदा च भवेत्, तत्क्षणमेव तेन सक्षमप्राधिकरणाय लिखितरूपेण सूचनीयं भविष्यति; तथा

2.7 यदि कश्चन छात्रः एकस्यां वा अधिकासु वा कक्षासु १५ दिवसपर्यन्तं सूचनां विना कक्षासु निरन्तरं अनुपस्थितः इति ज्ञायते तर्हि तस्य नाम क्रमसूचीतः निस्सारितं भविष्यति। परन्तु निर्धारितं पुनः प्रवेशशुल्कं तथा अन्यं अवशिष्टादिराशिं दत्त्वा आगामिपक्षान्तरे विश्वविद्यालयेन पुनः प्रवेशं लब्धुं शक्ष्यते।

2.8 कुलपतिः विशेषपरिस्थितौ उपर्युक्तस्य एकमासाधिकस्य निर्धारितावधेः परं पुनः प्रवेशं विचारयितुं शक्नोति।

**3. अनुशासनहीनतायां निम्नलिखितानि सम्मिलितानि -**

3.1 उपस्थितौ अनियमिता, निरन्तरं आलस्यं वा प्रमादः नियुक्तकार्यं प्रति उदासीनता वा;

3.2 कस्मिन् अपि कक्षाकक्षे वा कार्यालये वा पुस्तकालये, सभागारे क्रीडाङ्गणादिषु उपद्रवं सृजति;

3.3 शिक्षकाणां वा अधिकारिणां वा निर्देशानां अवज्ञा;

3.4 छात्रसंस्थानां निर्वाचनसमये वा सभायाः समये वा विश्वविद्यालयस्य पाठ्यक्रमस्य अथवा पाठ्यक्रमबाह्यक्रियाकलापस्य अन्तर्गतं कस्यापि प्रकृतेः दुराचारः वा दुर्व्यवहारः वा

3.5 परीक्षाकेन्द्रे कोऽपि कदाचारः दुराचारः वा;

3.6 विश्वविद्यालयस्य कञ्चित् शिक्षकं वा कञ्चित् कर्मचारिणं वा विश्वविद्यालयस्य कञ्चित् आगन्तुकं वा सुरक्षाकर्मचारिणं वा विरुध्य कस्यापि प्रकारस्य दुर्व्यवहारः अथवा कदाचारः;

3.7 विश्वविद्यालयस्य सम्पत्तौ/उपकरणे क्षतीकरणं विकृतीकरणं वा;

3.8 उपर्युक्तेषु किमपि कर्तुम् अन्येभ्यः प्रेरणाप्रसारणम्;

३.९ छात्राणां मध्ये भ्रामकसूचनाम् अथवा मिथ्यावादानां प्रसारणम्;

3.10 छात्रावासे निवसद्भिः दुष्टता, दुराचारः, उपद्रवः वा;

३.११ छात्राणां कृते 'सीमातः बहिः' इति घोषितस्थानेषु क्षेत्रेषु वा भ्रमणम्;

३.१२ विश्वविद्यालयस्य कार्याध्यक्षेण प्रसारितं परिचयपत्रं न सन्धारयति;

3.13 विश्वविद्यालयस्य कार्याध्यक्षस्य अन्येषां च कर्मचारिणां आवश्यकतायां परिचयपत्रं प्रस्तोतुं समर्पयितुम् वा अस्वीकारः;

3.14 जाति-वर्ग-धर्म-जात्याद्याधारेण यौन-उत्पीडनस्य, नवागन्तुकछात्रान् विरुध्य रैगिंग इत्याख्यप्रकारस्य उत्पीडनस्य, भेदभावस्य वा किमपि कार्यादिकम् ;

3.15 प्रतिबन्धितसङ्घटनानां सदस्यतया सहितं अवैधकार्यानुष्ठानं, सक्षमप्रधिकारिणां सम्यक् अनुमतिं विना सभानां शोभायात्रायाः चायोजनम् अथ च

3.16 अन्यः किमपि आचरणं यत् कस्मै अपि छात्रा अयोग्यम् इति मन्यते ।

4. अनुशासनस्य उल्लङ्घनस्य दोषिणः इति ज्ञातानां छात्राणां दण्डः यथा अधोलिखितं विस्तीर्णं -।

(i) दण्डः; (ii) परिसरे प्रतिबन्धाः; (iii) दूरीकरणम् (iv) निष्कासनम् च।

दोषिणे छात्राय यावत् आत्मरक्षणस्य उचितः अवसरः न दीयते तावत् कोऽपि दण्डः न दीयते। एतेन कुलपतिना कस्यापि अपराधिनः छात्रस्य विरुद्धं अनुशासनात्मकप्रक्रियायाः प्रवर्तनपर्यन्तं निलम्बनं कर्तुं न निवारयिष्यते।

5. छात्रस्य विषये अनुशासनेन अनुशासनात्मककार्याणि च सम्बद्धाः सर्वे अधिकाराः कुलपतिं प्रति निहिताः भविष्यन्ति। कुलपतिः स्वस्य सर्वाणि वा कांश्चन अधिकारान्, यथा योग्यं मन्यते, सक्षमप्राधिकरणाय वा अनुशासनसमित्याम्, यथाप्रकरणं, विश्वविद्यालयस्य कस्मैचित् अधिकारिणे वा समर्पयितुं शक्नोति।

6. (i) धारा 11(5) तथा विधान 29(1) इत्येतयोः क्षतिं विना निम्नलिखितसदस्यानां कृते अनुशासनसमितिः भविष्यति।

उ. कुलपतिः अथवा तेन नामाङ्कितः

ख. छात्रकल्याणपीठप्रमुखः

ग. पीठप्रमुखः

घ. यदा निवासभवनसम्बद्धं विषयं समितिसमीपे विचारार्थं स्थापयितुं आवश्यकं भविष्यति तदा वार्डन् इति छात्रावासपरिपालकः आमन्त्रितः भविष्यति।

ङ. संकायप्रमुखः (सदस्यः/सचिवः)

(ii) अधिनियमेन विधिना च कुलपतये प्रदत्तस्य कस्यापि अधिकारस्य अधीनं समितिः विश्वविद्यालयस्य छात्राणां अनुशासनस्य आचरणस्य च समुचितमानकैः सम्बद्धानां सर्वेषां विषयाणां संज्ञानं करिष्यति दण्डं दातुम् च अधिकाराः भविष्यन्ति चेद् अपराधी दण्डयोग्यः मन्यते।

क. उक्तसमित्या स्वकार्यनिष्पादनार्थं ते नियमाः निर्मास्यन्ते ये नियमाः उपयुक्ताः इति मन्यते एते च नियमाः अन्ये च तेषामन्तर्गतं कृताः आदेशाः विश्वविद्यालयस्य सर्वेषां छात्राणां कृते बाध्यकारिणः भविष्यन्ति।

ख. अनुशासनसमितेः अनुशंसाः कुलपतिं प्रति प्रस्तोष्यन्ते यस्य निर्णयः अन्तिमः बाध्यकारी च भविष्यति। परन्तु यदि कुलपतिः मन्यते यत् कोऽपि विषयः समीक्षां अर्हति इति तर्हि सः तं विषयं अनुशासनसमित्याः समीपं पुनर्विचारार्थं प्रेषयितुं शक्नोति।

ग. कुलपतेर्निर्णयविरुद्धम् आवेदने केन्द्रीयसंस्कृतविश्वविद्यालयविधि-२०२० इत्यस्य धारा३५तमायाः प्रावधानानुसारं कार्यं भविष्यति।

घ. उक्तसमित्याः सभायाः सम्मेलनपूर्तिसङ्ख्या कुलसदस्यानां अर्धा अपेक्षिता भविष्यति।

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**क्रीडासु क्रीडासमित्यां च**

**अध्यादेश सङ्ख्या 11**

**अधिनियमस्य धारा 6 (1) (xxviii) तथा 29 (1) (o) चेत्यस्य अन्तर्गतम्**

1. (क) क्रीडासु एका क्रीडासमितिः स्यात्, यस्यां निम्नलिखितसदस्याः स्युः, यथा-

1. कुलपतिना नियुक्तः एकः प्राध्यापकः - अध्यक्षः

2. छात्रकल्याणपीठप्रमुखः

3. नामाङ्कितानां छात्राणां मध्ये एकः उत्कृष्टः क्रीडकः, अध्यक्षेण एकवर्षस्य अवधिपर्यन्तं नामाङ्कितः

4. क्रीडाध्यापकः - पदाधिकारी सचिवः

(ख) समितेः अध्यक्षः त्रीणि वर्षाणि यावत् पदं धारयिष्यति।

2. समितिः निम्नलिखितकार्यजातं करिष्यति।

1. विश्वविद्यालयस्य क्रीडाणां आयोजनं पर्यवेक्षणं च तत्पक्षतः नियमानां निर्माणम्;

2. क्रीडानां कृते आयव्ययपत्रकस्य निर्माणम्;

3. विश्वविद्यालयस्य क्रीडाङ्गणानां, व्यायामशालानां च परिपालनम्;

4. प्रतियोगिता, प्रतियोगिता, एथलेटिक मीट इत्यादीनां आयोजनं कर्तुं;

5. प्रवेशार्थं नामाङ्कनार्थं उत्कृष्टक्रीडकानां क्रीडाजनानां च नाम्नां कुलपतिं प्रति अनुशंसनम्

6. शैक्षणिकपरिषद्द्वारा समये समये अन्यकार्याणाम् अनुष्ठानं; अथ च

7. विश्वविद्यालये उपलब्धानां क्रीडाप्रतिभानाम् आकर्षणोपायानाम् अनुष्ठानम्।

समितिः छात्रकल्याणनिदेशकस्य निरीक्षणे मासद्वये न्यूनातिन्यूनं एकवारं स्वसमागमं करिष्यति।

समितिसमागमे सम्मेलनपूर्तये अपेक्षिता सङ्ख्या समग्रसदस्यानाम् अर्धमिता भविष्यति।

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**शोध-उपाधि-कार्यक्रम/पाठ्यक्रमाणाम् अतिरिक्तं शोध-उपाधि-कार्यक्रमेषु/पाठ्यक्रमेषु छात्राणां कार्य-प्रदर्शन-मूल्याङ्कन-विषये च सर्वेषां शास्त्री(स्नातक-उपाधि)/आचार्य (स्नातकोत्तर-उपाधि)स्नातकोत्तर-डिप्लोमा/डिप्लोमा-प्रमाणपत्र-कार्यक्रम/पाठ्यक्रमेषु सेमेस्टर-प्रणाल्याः अनुसरणं कृत्वा परीक्षा-संचालन-विधिः**

## अध्यादेशसङ्ख्या 12

### अधिनियमस्य धारा 6 (1) (ii) 29 (1) (ग), (छ) चेत्यन्तर्गतम्

प्रयोज्यता- एते अध्यादेशाः शास्त्री (स्नातकपदवी)/आचार्यः(स्नातकोत्तरपदवी) तथा स्नातकोत्तरडिप्लोमा/डिप्लोमा-प्रमाणपत्राणां कृते सर्वेषु कार्यक्रमेषु/पाठ्यक्रमेषु प्रयोज्याः भविष्यन्ति, ये अस्मिन् विश्वविद्यालयेन सेमेस्टरपरीक्षाव्यवस्थान्तर्गतं (शोधकार्यक्रमान् अतिरिच्य) आरब्धाः।

1. शिक्षामाध्यमम्

१.१. अस्य विश्वविद्यालयस्य सदनैः/अध्ययनविभागैः प्रदत्तानां सर्वेषां कार्यक्रमाणां/पाठ्यक्रमाणां विषये निर्देशानां माध्यमं शैक्षणिकपरिषद्द्वारा निर्धारितं भविष्यति।

१.२. विश्वविद्यालयस्य परीक्षाणां कृते सर्वेषां कार्यक्रमाणां/पाठ्यक्रमाणां सर्वेषां विषयाणां सम्बद्धानि प्रश्नपत्राणि संस्कृतेन अथवा विषयस्य आवश्यकतानुसारं निर्धारितानि भविष्यन्ति, भाषा/साहित्यस्य परीक्षायाः सन्दर्भं विहाय, यस्मिन् पाठ्यक्रमस्य आवश्यकताः आधारीकृत्य शैक्षणिकपरिषदः अनुशंसानुसारं प्रश्नपत्रं निर्धारितं भविष्यति, तत्तत्भाषासु च सम्पूर्णतया वा अंशतः वा सज्जीकृत्य उत्तरं दातुं शक्ष्यते, यथा हि मण्डलेन निर्णयः करिष्यते।

**2. परीक्षाः**

**परिभाषाः-**

2.1 **शैक्षणिककार्यक्रमाणां/पाठ्यक्रमाणाम्** अर्थः अस्ति एतादृशः कार्यक्रमः/पाठ्यक्रमः यस्मिन् विषयाः अथ च/अथवा अन्यः कोऽपि घटकः सम्मिलितः स्यात् येन शास्त्री (स्नातकपदवी)/आचार्य (स्नातकोत्तरपदवी) तथा स्नातकोत्तर डिप्लोमा/डिप्लोमा-प्रमाणपत्राणां प्रदानं भवेत् ।

2.2 **शैक्षणिकवर्षं** - छात्रैः शिक्षणपरीक्षायोजनायां निर्दिष्टानां आवश्यकतानां पूर्णतायै समर्पितं प्रायः 12 मासानां अवधिः भवति, अस्मिन् अध्यादेशे च निर्धारितरीत्या 'अवधिः(सत्रम्)' 'अवकाशाः' इत्यादिषु विभक्तं भवति।

2.3 सेमेस्टरव्यवस्था एकं शैक्षणिकपदम् अस्ति येन शैक्षणिकवर्षं द्वयोः भागयोः विभक्तं भवति ।

2.4 अध्ययनमण्डलस्य (अथवा BOS) इत्यस्य अर्थः पाठ्यक्रमं प्रदातुं तत्सम्बद्धस्य विद्यालयस्य अध्ययनमण्डलं भविष्यति।

2.5 **विषयः** शैक्षणिककार्यक्रमस्य/पाठ्यक्रमस्य एकः तादृशः घटकः, यस्मिन् विशिष्टा कूटसङ्ख्याः विशिष्टानि श्रेयांसि च समाहिताः भवन्ति । परीक्षाविभागस्य परामर्शेन विषयाणां कृते कूटानि आवंटितानि भविष्यन्ति।

2.6 **बाह्यपरीक्षकः-** बाह्यपरीक्षकस्य अभिप्रायः तादृशः संकायसदस्यः भविष्यति यः तस्याः संस्थायाः न भवति यत्र छात्रः नामाङ्कितः अस्ति, नियुक्तः कृतः सः अन्तिमसत्रपरीक्षाप्रश्नपत्रस्य निर्माणाय/परीक्षानियन्त्रणाय/उत्तरपत्राणां मूल्याङ्कनस्य भूमिकायै च नियुक्तः भवितुमर्हति अथ च/अथवा विश्वविद्यालये व्यावहारिकपरीक्षकरूपेण कार्यं कर्तुं शक्नोति ।

**2.7 आन्तरिकपरीक्षकः-** आन्तरिकपरीक्षकस्य अभिप्रायः एकः परीक्षकः यः तस्याः एव संस्थायाः अस्ति अथ च प्रश्नपत्राणां निर्माणस्य, उत्तरपत्रस्य मूल्याङ्कनस्य, सिद्धान्तवर्गपरीक्षाणां/व्यावहारिकवर्गपरीक्षाणां संचालनस्य कृते अथ च/अथवा विश्वविद्यालये व्यावहारिकपरीक्षकस्य कार्यं कर्तुं दायित्वे न्यस्तो भवति।

**2.8 छात्रः** - विश्वविद्यालयस्य कस्मिन् अपि विद्यालये यस्मिन् शैक्षणिकवर्षे कार्यक्रमान्/पाठ्यक्रमान् अनुसृत्य नामाङ्कितः जनः छात्रः अभिप्रेतः यस्मिन् अयं अध्यादेशः प्रवर्तते।

**2.9 विश्वविद्यालयः-** विश्वविद्यालयस्य अर्थः श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयः स्यात्।

**2.10 CE/CCIA -** इत्यस्य अर्थः छात्राणां निरन्तरमूल्याङ्कनम्/व्यापकं निरन्तरं च आन्तरिकमूल्याङ्कनं भविष्यति।

**2.11 सत्रं/सत्रसमाप्तिपरीक्षायाः** अर्थः सत्रस्य समाप्तेः अनन्तरं विश्वविद्यालयेन कृता परीक्षा भविष्यति।

**2.12 DCO** इत्यस्य अर्थः सम्बद्धेन संकायसदस्येन (सदस्यैः) निर्मिता विस्तृतपाठ्यक्रमरूपरेखा अथवा व्याख्यानयोजना भविष्यति।

**3. परीक्षाणां शैक्षणिकपाठ्यक्रमः**

3.1 विश्वविद्यालयः एतादृशानां सर्वेषां शैक्षणिककार्यक्रमाणाम्/पाठ्यक्रमाणाम् परीक्षां आयोजयिष्यति, येषाम् अनुमोदनं शैक्षणिकपरिषद्द्वारा भवति तथा च येषां कृते उपाधि/डिप्लोमा/प्रमाणपत्रस्य, शैक्षणिकपरिषद्द्वारा निर्धारितस्य पाठ्यक्रमस्य तथा शिक्षणपरीक्षायाः च प्रदानाय समये समये सूचितानां योजनानुसारं अनुमोदिताः भवन्ति।

**4. परीक्षाणां मापदण्डः**

4.1 विश्वविद्यालयस्य परीक्षाः विश्वविद्यालये अध्ययनस्य कस्यापि कार्यक्रमस्य/पाठ्यक्रमस्य कृते नामाङ्कितानां छात्राणां कृते पाठ्यक्रमे/अध्ययनस्य पाठ्यक्रमे/विषयस्य कृते निर्दिष्टकालस्य कृते शिक्षणस्य परीक्षायाश्च पाठ्यक्रमे योजनायां च उद्घाटिताः स्थास्यन्ति।

4.2 तत्र समयोऽस्ति यत् शैक्षणिकपरिषद् समये समये निर्धारितसमयानाम् पूर्तये कस्यापि निर्दिष्टस्य शैक्षणिककार्यक्रमस्य/पाठ्यक्रमस्य कृते विश्वविद्यालयपरीक्षां दातुं अन्यस्य कस्यापि अन्यवर्गस्य अभ्यर्थिनां/छात्राणां कृते अनुमतिं दातुं शक्नोति।

4.3 पुनश्च समयः अस्ति यद् एतेषां अध्यादेशानां नवमखण्डे  अथवा विश्वविद्यालयस्य अन्यस्मिन् अध्यादेशे निहितप्रावधानानाम् अनुसारं छात्रस्य परीक्षायाम् उपस्थितिः निषिद्धा भवितुम् अर्हति।

**5. पाठ्यक्रमस्य सामग्री अवधिः च**

5.1 शास्त्री(स्नातक)/आचार्य(स्नातकोत्तर)-उपाधेः तथा स्नातकोत्तर-डिप्लोमा/डिप्लोमा-प्रमाणपत्रस्य कार्यक्रमस्य/पाठ्यक्रमस्य सम्बद्धकार्यक्रमस्य पाठ्यक्रमेषु शिक्षणपरीक्षायाः योजनायां सम्बन्धितेन अध्ययनमण्डलेन प्रस्ताविताः शैक्षणिकपरिषद्द्वारा अनुमोदिताः च निर्दिष्टाः अनेके विषयाः सम्मिलिताः भविष्यन्ति । प्रत्येकं विषयाय नियुक्तश्रेयसः सन्दर्भेण भारः दत्तो भविष्यति। उपाधिप्रदानार्थं न्यूनतमं/अधिकतमं श्रेयसः सङ्ख्या सम्बद्धकार्यक्रमस्य/पाठ्यक्रमस्य शिक्षणपरीक्षायाः पाठ्यक्रमेण योजनायाश्च निर्दिष्टा भविष्यति।

**5.2 कार्यक्रमं/पाठ्यक्रमं पूर्णं कर्तुं न्यूनतमः अवधिः** सम्बद्धकार्यक्रमस्य/पाठ्यक्रमस्य शिक्षणपरीक्षायाः पाठ्यक्रमे योजनायां च निर्दिष्टः कार्यक्रमस्य/पाठ्यक्रमस्य अवधिः निर्धारितः भविष्यति।

**5.3 कस्यचित् कार्यक्रमस्य/पाठ्यक्रमस्य समाप्त्यर्थं अधिकतमो अवधिः**
सम्बद्धकार्यक्रमस्य/पाठ्यक्रमस्य शिक्षणपरीक्षायाः च पाठ्यक्रमे तथा योजनायां निर्दिष्टः अधिकतमः कार्यक्रमस्य/पाठ्यक्रमस्य अवधिः निर्धारितः भविष्यति। सर्वेषां कार्यक्रमाणां/पाठ्यक्रमाणाम् आवश्यकताः निर्दिष्टावधिमध्ये पूर्णाः करणीयाः भविष्यन्ति।

6. **शैक्षणिकवर्षम्**

6.1 शैक्षणिकवर्षं द्वयोः सत्रयोः विभक्तं भविष्यति । द्वयोः सत्रयोः प्रत्येकस्य अवधिः प्रायः १८ सप्ताहाः अधिकं वा भविष्यति । प्रथमसत्रस्य अनन्तरं प्रायः  सप्ताहद्वयस्य विरामः भविष्यति तथा च द्वितीयसत्रस्य/सत्रस्य अनन्तरं प्रायः  सप्ताहचतुष्टस्य विरामः भविष्यति।

अध्यापनकार्ये समर्पिते शैक्षणिकसत्रस्य विवरणं निम्नलिखितरूपेण भविष्यति :-

**6.2 अनुदेशप्रदानं/ प्रयोगशालाकार्यं वा -**

(वर्गपरीक्षा/नियुक्ति/परियोजना/प्रशिक्षण/इण्टर्न्शिप सहित) - १४ सप्ताहाः अधिकं वा

प्राम्भिकावकाशः - ०१ सप्ताहः अधिकं वा

सेमेस्टर/सत्रस्य अन्ते परीक्षाः, प्रैक्टिकल/प्रयोगशालापरीक्षाभिः सह-

०३ सप्ताहाः वा अधिकं वा

शैक्षणिकदिनाङ्कपत्रिका प्रतिवर्षं शैक्षणिकवर्षस्य आरम्भात् पूर्वं शैक्षणिकविभागेन सूचिता भविष्यति।

**7. परीक्षाशुल्कम्**

विश्वविद्यालयः शैक्षणिकपरिषद्द्वारा अनुमोदनस्य अनन्तरं विविधपरीक्षाणां कृते छात्रैः देयशुल्कं सूचयिष्यति। यः छात्रः परीक्षायाः पूर्वं निर्धारितशुल्कं न दत्तवान् सः सामान्यतया परीक्षायाम् उपस्थितः न भविष्यति । कुलपतिः स्वविवेकेन वास्तविककष्टस्य कतिपयेषु प्रकरणेषु शुल्कप्रदानस्य अन्तिमदिनाङ्कविस्तारस्य अनुमतिं दातुं शक्नोति।

अपवादात्मकपरिस्थितौ कुलपतिः शुल्क-शुल्केतरशुल्कं यदि अस्ति तर्हि तत् क्षन्तुं शक्नोति।

विश्वविद्यालयस्य सक्षमप्राधिकारिणा किमपि परिवर्तनं कृत्वा परीक्षाशुल्कं अन्यशुल्कानि च अस्मिन् विषये विश्वविद्यालयस्य अध्यादेशानुसारं प्रयोज्यानि भविष्यन्ति तथा च पाठ्ययोजना(प्रोस्पेक्टस्) मध्ये अपि प्रकाशितनि भविष्यन्ति।

**8. उपस्थितिः**

8.1 विश्वविद्यालयस्य आकलन-मूल्याङ्कनव्यवस्थायां उपस्थितिः एकः महत्त्वपूर्णः घटकः अस्ति।

8.2 उपस्थित्यर्थं अङ्कानां आवण्टनस्य मापदण्डाः सम्बद्धसंकायसदस्येन विस्तृतपाठ्यक्रमरूपरेखायां (DCO) अथवा व्याख्यानयोजनायां उल्लिखिताः भविष्यन्ति।

8.3 पाठ्यक्रमं नियन्त्रयन् शिक्षकः पाठ्यक्रमाय पञ्जीकृतानां छात्राणां उपस्थिति-अभिलेखस्य निर्वाहस्य उत्तरदायी भविष्यति तथा च सम्बद्ध-विद्यालय-संकाय-प्रमुखस्य/सम्बद्ध-विभागप्रमुखस्य माध्यमेन मासिक-उपस्थिति-अभिलेखं शैक्षणिक-विभागाय प्रेषयिष्यति।

8.4 एकस्मिन् सेमेस्टर/सत्रे एकत्र गृहीतेषु सर्वेषु विषयेषु न्यूनतमं 75% उपस्थितिः आवश्यकी भविष्यति, तत्र समयः यत् कुलपतिः अभिलेखनीयानां कारणानां कृते व्यक्तिगतछात्राणां कृते 5% पर्यन्तं उपस्थितिन्यूनताम् अनुमोदयितुं शक्नोति। परन्तु कस्मिन् अपि सन्दर्भे यस्य छात्रस्य समुच्चय-उपस्थितिः एकस्मिन् सेमेस्टर/सत्रे ७५% तः न्यूना भवति, तस्मै सेमेस्टर/सत्रस्य अवध्यन्त-परीक्षायाम् उपस्थितिः नानुमता भविष्यति।

कस्यापि वैधानिकनियामकसंस्थायाः विनियमितपाठ्यक्रमस्य कृते यदि वैधानिकसंस्था उपस्थितेः कृते किमपि विशिष्टं दिङ्निर्देशं प्रददाति तर्हि तत् सम्बद्धविद्यालयस्य अध्ययनमण्डलेन अनुमोदनानुसारं प्रयोज्यं भविष्यति।

8.5 कस्मिंश्चित्  विषये ७५% तः न्यूनतया उपस्थितेः कृते तस्मिन् विषये उपस्थितेः कृते शून्याङ्काः प्रदत्ताः भविष्यन्ति ।

8.6 सम्बद्धसङ्कायसदस्य(सदस्याः) द्वारा प्रस्तुतायाः उपस्थितेः अभिलेखस्य आधारेण कस्मिंश्चित् विषये उपस्थितेः अंकाः प्रदास्यन्ति। उपस्थितये दीयमानानाम् अङ्कानां विवरणं अधोलिखितसारण्यनुसारं भविष्यति।

| **उपस्थिति-हेतु समग्राः अङ्काः** | **उपस्थितिसीमा** | **आवण्टिताङ्काः** |
|---|---|---|
| 5 (पञ्च) | 75%तोऽधिका तत्तुल्या 80%तः न्यूना तत्तुल्या वा | 1 |
| | 80%तोऽधिका तत्तुल्या 85%तः न्यूना तत्तुल्या वा | 2 |
| | 85%तोऽधिका तत्तुल्या 90%तः न्यूना तत्तुल्या वा | 3 |
| | 90%तोऽधिका तत्तुल्या 95%तः न्यूना तत्तुल्या वा | 4 |
| | 95%तोऽधिका तत्तुल्या100%तः न्यूना तत्तुल्या वा | 5 |

8.7 यः छात्रः उपस्थितेः अभावात् अनुमतः न भवति तेन उक्तस्य सेमेस्टर/सत्रस्य सर्वेषु विषयेषु अग्रिमछात्रसमूहेन सह पुनरावृत्तिः करणीया भविष्यति। परन्तु एतादृशस्य छात्रस्य विश्वविद्यालयनामाङ्कनसङ्ख्या अपरिवर्तिता एव स्थास्यति तेन/तया च खण्डे 5.3 उल्लिखिते अधिकतमानुमतावधिमध्ये पाठ्यक्रमः सम्पन्नः करणीयो भविष्यति।

शैक्षणिकविभागः परीक्षायाः आरम्भात् न्यूनातिन्यूनं ५ दिनाङ्कपत्रिकादिनपूर्वं सम्बद्धविभागेभ्यः प्राप्तानां उपस्थिति-अभिलेखानां आधारेण सेमेस्टर/सत्रान्तपरीक्षायां उपस्थित्यनुसारम् अयोग्यानां सर्वेषां छात्राणां नाम घोषयिष्यति परीक्षा नियन्त्रकं प्रति च तत् सूचयिष्यति।

8.8 यदि कश्चन अस्वीकृतः छात्रः सेमेस्टर/सत्र/पूरकपरीक्षायां उपस्थितः भवति तर्हि तस्य परिणामः अमान्यः मंस्यते।

8.9 यदि कश्चन छात्रः चिकित्साकारणात् कक्षासु अनुपस्थितः तिष्ठति तर्हि तेन कक्षायां प्रत्यागमनस्य एकसप्ताहस्य अन्तः कस्यापि शासकीयचिकित्सालयेन प्रसारितं "चिकित्साप्रमाणपत्रं" विभागप्रमुखाय प्रस्तोतवयम्। एकसप्ताहस्य निर्धारितसमयस्य समाप्तेः अनन्तरं चिकित्साप्रमाणपत्राणि नैव स्वीकरिष्यन्ते विचारणीयानि वा न भविष्यन्ति।

9. परीक्षासञ्चालनम्

9.1 विश्वविद्यालयस्य सर्वाः परीक्षाः (विभिन्नकार्यक्रमेषु/अध्ययनपाठ्यक्रमेषु प्रवेशार्थं प्रवेशपरीक्षां विहाय) केवलं विश्वविद्यालयपरिसरस्य मध्ये एव आयोजयिष्यन्ते।

9.2 येषु कार्यक्रमेषु/अध्ययनपाठ्यक्रमेषु छात्राः विभागेषु नामाङ्किताः सन्ति, तेषां सेमेस्टर/सत्रसमाप्तिपरीक्षाणां समयसूची परीक्षानियन्त्रकस्य (CoE) कार्यालयेन निर्मिता भविष्यति तथा सम्बद्धपरीक्षाणाम् आरम्भात् न्यूनातिन्यूनं 15 (पञ्चदश) दिवसपूर्वं सर्वेभ्यः विभागप्रमुखेभ्यः प्रेषिता भविष्यति।

9.3 विश्वविद्यालयस्य सर्वेषां विभागानां सेमेस्टर/सत्रसमाप्तिपरीक्षाः परीक्षानियन्त्रकस्य सामान्यपरिवेक्षणेन आयोजयिष्यन्ते स हि कुलपतेः अनुमोदनेन उपर्युक्तपरीक्षाणां संचालनार्थं केन्द्राधीक्षकान् (CS) उपकेन्द्राधीक्षकान् (DCS) च नियुक्तान् करिष्यति।

9.4 अस्मिन् अध्यादेशे उल्लिखितानां तथा च समये समये संशोधितायाः विश्वविद्यालयस्य आकलनमूल्याङ्कनव्यवस्थायाः दिङ्निर्देशानुसारं सम्बद्धविभागानाम् सम्बद्धसंकायसदस्यैः निरन्तरं मूल्याङ्कनं/व्यापकं निरन्तरम् आन्तरिकमूल्याङ्कनं (CE/CCIA) च करिष्यते।

9.5 सम्बद्धविभागस्य प्रमुखाः आकलन-मूल्याङ्कनव्यवस्थायाः (सीई/सीसीआईए इत्यस्याः) सञ्चालनम् अतीव सुचारुरूपेण सुनिश्चितं करिष्यन्ति येन छात्राणां मूल्याङ्कनं सीई/सीसीआईए इत्यस्याः भावनायां निरन्तरं व्यापकतया च भवेत्।

9.6 उपस्थितेः मूल्याङ्कनम् उपस्थितेः आधारेण अङ्कप्रदानं च सीई/सीसीआईए इत्यस्य भागः भविष्यति।

9.7 विश्वविद्यालयः प्रत्येकं सेमेस्टर/सत्रे, कार्यप्रदर्शनस्य स्तरं निर्धारयितुं, यत्र यत्र उचितं तत्र-तत्र, परियोजनाः/प्रबन्धं/क्षेत्रकार्यं/गोष्ठीः व्यावहारिकाणि  कर्तुं शक्नोति, यत्र यत्र च उचितं भवति तत्र व्यक्तिगतकार्यक्रमस्य/पाठ्यक्रमस्य अनुसरणं कुर्वतां छात्राणां कृते इण्टर्न्शिप्/प्रशिक्षणं वा अन्यं कमपि प्रविधिम् अपि निर्धारयितुं शक्नोति।

**10. परीक्षाप्रणाली**

10.1 विश्वविद्यालयस्य सर्वे कार्यक्रमाः/अध्ययनपाठ्यक्रमाः सेमेस्टर/सत्रव्यवस्थायाः अन्तर्गतं प्रस्ताविताः भविष्यन्ति तथा च छात्राणां परीक्षाः मूल्याङ्कनं च मूल्याङ्कनमूल्याङ्कनव्यवस्थायाः माध्यमेन भविष्यन्ति

10.2 सामान्यसिद्धान्तरूपेण आकलन-मूल्याङ्कनव्यवस्थायां निम्नलिखितघटकाः समाविष्टाः भविष्यन्ति ।

i. विषयशिक्षकैः निरन्तरमूल्याङ्कनम्/आन्तरिकमाकलनम्

ii. सेमेस्टर/सत्रसमाप्तिपरीक्षाद्वारा मूल्याङ्कनम्

10.3 मूल्याङ्कनस्य विभिन्नघटकानाम् भारवितरणस्य दिङ्निर्देशाः निम्नलिखितरूपेण भविष्यन्ति ।

**क. सिद्धान्तविषयः**

I. निरन्तरमूल्याङ्कन/व्यापकनिरन्तरम् आन्तरिकमूल्याङ्कनम् (CE/CCIA) (असाइनमेण्ट्/क्विज/गृहपरीक्षा/प्रस्तुतिः/लाइव-परियोजना इत्यादीनां कृते १५% तथा उपस्थितेः कृते ५%) : 20%

II. सेमेस्टर/सत्रसमाप्तिपरीक्षा (ESE) : 80% .

**ख. प्रायोगिक-/प्रयोगशाला-विषयः**

I.अध्यापकैः सततमूल्याङ्कनं/आन्तरिकं मूल्याङ्कनं प्रायोगिककार्यजातम् च - 50%

II.सेमेस्टर/सत्रसमाप्तिपरीक्षा - 50%

10.4 विषयेभ्यः(विषयेषु) आवण्टितश्रेयोऽङ्कान् विहाय आकलन-मूल्याङ्कन-प्रणाल्याः अन्तर्गत-अङ्कानां विवरणं निम्नलिखितरूपेण भविष्यति-

| **आकलनम् मूल्याङ्कनप्रणाली च** | **2** श्रेयसी | **4** श्रेयांसि | **6** श्रेयांसि |
|---|---|---|---|
| सततमूल्याङ्कनं/व्यापकसततम् आन्तरिकम् आकलनम् (सीसीआईए) | 20 अङ्काः | 20 अङ्काः | 20 अङ्काः |
| सैमेस्टर-/सत्रस्य अन्ते परीक्षा | 80 अङ्काः | 80 अङ्काः | 80 अङ्काः |
| समग्रतया | 100 अङ्काः | 100 अङ्काः | 100 अङ्काः |

10.5 पाठ्यक्रमस्य अन्यस्य कस्यचित् घटकस्य कृते यः उपर्युक्तेषु न समाविष्टः अस्ति, तस्य भारः कुलपतेः अनुमोदनेन शैक्षणिकपरिषदः सूचनानुसारं च अध्ययनमण्डलेन निर्धारितः भविष्यति।

**11. निरन्तरमूल्याङ्कनस्य/व्यापकनिरन्तरन्तरिकाकलनस्य सञ्चालनम्**

11.1 सिद्धान्तपाठ्यक्रमे सीई/सीसीआईए इति निरन्तरमूल्याङ्कने/व्यापकनिरन्तरान्तरिकाकलने सम्बद्धेन अध्ययनमण्डलेन (BOS) तथा विद्यालयमण्डलेन (SB) निर्धारितरूपेण लिखितपरीक्षा, परियोजना(असाइनमेण्ट्), प्रस्तुतिः, प्रश्नोत्तराणि, साक्षात्कारपरीक्षा(वाइवा-वॉसे), प्रकरणाश्रिताध्ययनम्(केसस्टडी), समूहचर्चा इत्यादीनि समाविष्टानि भवितुमर्हन्ति।

11.2 प्रयोगशालाघटकयुक्तेषु पाठ्यक्रमेषु छात्रेण कृतस्य प्रत्येकस्य प्रायोगिकस्य मूल्याङ्कनं सम्बद्धसङ्कायसदस्येन विधास्यते। मूल्याङ्कने व्यावहारिकाभ्यासानां/प्रयोगाणाम् लिखितसामग्री, प्रयोगानां प्रदर्शने सटीकता, मौखिकपरीक्षा इत्यादीनां समावेशः भविष्यति।

11.3 औद्योगिकप्रशिक्षणस्य/परियोजनायाः/प्रबन्धस्य सन्दर्भे निरन्तरमूल्याङ्कने/व्यापकनिरन्तरान्तरिकाकलनान्तर्गतं आवधिकप्रगतिप्रतिवेदनानि समाविष्टानि भविष्यन्ति।

11.4 क्षेत्रकार्यस्य सन्दर्भे निरन्तरमूल्याङ्कने/व्यापकनिरन्तरान्तरिकाकलनान्तर्गतं व्यावसायिकविकासः, अभिलेखपालनं, पर्यवेक्षणस्य उपयोगः, क्षेत्रकार्यस्य नियमितता, व्यक्तिगतसमूहसम्मेलनानि, ग्रामीणशिबिराणि, व्यवहारप्रयोगशालाकार्याणि, कौशलप्रयोगशालाकार्याणि च सम्बद्धविषयेषु अध्ययनमण्डलेन अनुमोदितस्य अध्ययनस्य कार्यक्रमस्य/पाठ्यक्रमस्य अनुसारं सम्मेलयिष्यन्ते।

11.5 सम्बद्धविभागः प्रत्येकस्य छात्रस्य निरन्तरमूल्याङ्कनेन/व्यापकनिरन्तरान्तरिकाकलनेन सम्बद्धं सम्पूर्णं अभिलेखं धारयिष्यति तथा च सम्बद्धविभागस्य सूचनाफलके तदेव प्रदर्शयिष्यति। प्रत्येकं विभागः सेमेस्टर/सत्रसमाप्तपरीक्षायाः समाप्तेः एकसप्ताहस्य अन्तः निरन्तरमूल्याङ्कनस्य/व्यापकनिरन्तरान्तरिकाकलनस्य अभिलेखं परीक्षानियन्त्रकस्य (COE) कार्यालये प्रस्तोष्यति।

11.6 यदि कश्चन छात्रः कस्मिन् अपि पाठ्यक्रमे निरन्तरमूल्याङ्कन/व्यापकनिरन्तरान्तरिकाकलनमध्ये उपस्थितः न भवति तर्हि तस्मै "F" इति

श्रेणी(ग्रेड) दत्ता भविष्यति तथा च तस्मिन् पाठ्यक्रमे उपस्थितेः आधारेण योग्यः सन् अपि तस्मै सेमेस्टर/सत्रसमाप्तिपरीक्षायाम्(ESE) उपस्थातुम् अनुमतिः नैव दास्यते।

11.7 निरन्तरमूल्याङ्कनम्/व्यापकनिरन्तरान्तरिकाकलनम् इत्यस्य अन्तर्गतं सर्वासां परियोजनानां(असाइनमेण्ट्), प्रश्नोत्तरी इत्यादीनां घटकानां मूल्याङ्कनं सम्बद्धसङ्कायसदस्यानां अनिवार्यं कर्तव्यं भविष्यति।

11.8 अध्ययनस्यपाठ्यक्रमम् अनुसरतः प्रत्येकं छात्रस्य पाठ्यक्रमस्य समाप्त्यर्थं विश्वविद्यालयेन निर्धारितमान्यतानां अनुपालनं करणीयम् भविष्यति।

**12. सेमेस्टर/सत्रसमाप्तिपरीक्षायाः सञ्चालनम्**

12.1 सामान्यतया प्रत्येकस्मिन् सेमेस्टर/सत्रे निर्दिष्टे मासे विश्वविद्यालयेन विभिन्नविषयाणां/पाठ्यक्रमानाम् सत्रसमाप्तिपरीक्षाः आयोज्यन्ते। छात्राः सम्बद्धविषयस्य/पाठ्यक्रमस्य न्यूनतमं अध्ययनकालं पूर्णं कृत्वा परीक्षायां सम्मिलिताः भविष्यन्ति।

12.2 सेमेस्टर/सत्रसमाप्तिपरीक्षाणाम् आरम्भात् न्यूनातिन्यूनं 10 दिवसपूर्वं परीक्षानियन्त्रकेण अधिसूचना प्रसारयिष्यते।

यदि छात्राः विश्वविद्यालयेन सह केनचिद् अन्येन विश्वविद्यालयेन अथवा मान्यताप्राप्तसंस्थया सह निष्पादितस्य कस्यापि सहमतिपत्रस्य समयानाम् अनुसारं कस्मिन् अपि भिन्नपाठ्यक्रमे प्रवेशं गृह्णन्ति तर्हि ते अस्य विश्वविद्यालयस्य कार्यक्रमानुसारं सेमेस्टर/सत्रसमाप्तिपरीक्षायां सम्मेलितुम् अर्हिष्यन्ति येन ते उपाधि/डिप्लोमा-कृते पूर्वापेक्षितं विषयं/पाठ्यक्रमम अपर-विश्वविद्यालयात्/मान्यताप्राप्तसंस्थाभ्यः सम्पन्नं कर्तुं शक्नुयुः।

12.3 विश्वविद्यालयः एतेषां पाठ्यक्रमानाम् यथासमयं निर्णयानुसारं तात्कालिकीयाभासीयविधिना (आन्लाईन)परीक्षां आयोजयितुं शक्नोति । विनियमेन निर्धारितरीत्या तात्कालिकीयाभासीयविधिना (आन्लाईन)परीक्षा आयोजिता भविष्यति।

12.4 व्यापक-मुक्त-ऑनलाइन-पाठ्क्रमस्य(एमओओसी-)अन्तर्गतं विश्वविद्यालयेन प्रस्तावितेषु विविधपाठ्यक्रमेषु नामाङ्कितानां छात्राणां कृते सेमेस्टर/सत्रान्तपरीक्षाः निर्धारितप्रक्रियानुसारं विश्वविद्यालयेन अथवा अधिकृतसंस्थया संचालिताः भविष्यन्ति।

12.5 सर्वेषां सेमेस्टर/सत्राणाम् अन्ते पूरकपरीक्षा कुलपतेः अनुमोदनेन परीक्षानियन्त्रकेन आयोजयिष्यते।

12.6 सिद्धान्तव्यावहारिकपरीक्षाणां, परियोजनाप्रतिवेदनस्य/प्रबन्धस्य/प्रशिक्षणप्रतिवेदनस्य तथा अन्यस्य कस्यापि अवधिसमाप्तमूल्याङ्कनघटकस्य सर्वेषां परीक्षकाणां नियुक्तिः कुलपतेः अनुमोदनेन भविष्यति।

